ओं नमः परमात्मने, श्री महागणपतये नमः,

श्री गुरुभ्यो नमः, ह॒रि॒ः ओं ॥

# कृष्ण यजुर्वेदीय तैत्तिरीय संहिता

# पद पाठः (वाक्य सहित)

# द्वितीयकाण्डे प्रथमः प्रश्नः

**Notes:**

- **Please refer to the book "TS Kandam 1" and "TS 1.1 Pada Paatam with Vaakyam" for notes and conventions used in this Compilation.**
- **Please download our vedic compilations from our web site www.vedavms.in.**

**Version 0.3** **October 31, 2022**

## Version Notes:

**This is now the current Version 0.3 dated October 31, 2022.**

1. This replaces the earlier version 0.2 dated Aug 31, 2020.

2. This version has been updated with the errors found and reported till Oct 31, 2022.

3. Required convention, style and presentation improvements or standardisations has been done whereever applicable.

4. In this Compilation the Samita Vaakyams have been suitably aligned, synchronised and refurbished in line with “Pada Paatam”.

## Earlier Versions

| | | |
|---|---|---|
| 1st | Version Number | 0.0 dated 30th June 2019 |
| 2nd | Version Number | 0.1 dated 31st May 2020 |
| 3rd | Version Number | 0.2 dated 31st Aug 2020 |

# Contents

2 कृष्ण यजुर्वेदीय तैत्तिरीय संहिता पद पाठे द्वितीयं काण्डं............ 4

2.1 द्वितीयकाण्डेप्रथमः प्रश्नः – पशुविधानं............ 4

**ओं नमः परमात्मने, श्री महागणपतये नमः, श्री गुरुभ्यो नमः**

**हरिःओं**

# 2 कृष्ण यजुर्वेदीय तैत्तिरीय संहिता पद पाठे

# द्वितीयं काण्डं

## 2.1 द्वितीयकाण्डेप्रथमः प्रश्नः – पशुविधानं

**TS 2.1.1.1**

वायव्य॑ꣳ श्वेतमा ल॑भेत भूतिकामो वायुर्वै क्षेपिष्ठा देवता वायुमेव स्वेन भागधेयेनोप धावति स एवैनं भूतिं गमयति भवत्येवा–तिक्षिप्रा देवतेत्याहुः सैनमीश्वरा प्रदह इत्येतमेव सन्तं ँवायवे नियुत्वत आ लभेत नियुद्वा अस्य धृतिर्द्धृत एव भूतिमुपैत्यप्रदाहाय भवत्येव – [ ] 1

**TS 2.1.1.1 (Padam)**

वायव्यम् । श्वेतम् । एति । लभेत । भूतिकाम इति भूति–कामः । वायुः । वै । क्षेपिष्ठा । देवता । वायुम् । एव । स्वेन । भागधेयेनेति भाग – धेयेन । उपेति । धावति । सः । एव । एनम् ।

भूतिम् । गमयति । भवति । एव । अतिक्षिप्रेत्यति – क्षिप्रा । देवता ।
इति । आहुः । सा । एनम् । ईश्वरा । प्रदह इति प्र–दहः । इति ।
एतम् । एव । सन्तम् । वायवे । नियुत्वत इति नि–युत्वते । एति ।
लभेत । नियुदिति नि – युत् । वै । अस्य । धृतिः । धृतः । एव ।
भूतिम् । उपेति । एति । अप्रदाहायेत्यप्र – दाहाय । भवति ।
एव । **1 (50)**

**TS 2.1.1.2**

वायवे नियुत्वत आ लभेत ग्रामकामो वायुर्वा इमाः प्रजा नस्योता नेनीयते वायुमेव नियुत्वन्त७ स्वेन भागधेयेनोप धावति स एवास्मै प्रजा नस्योता नियच्छति ग्राम्येव भवति नियुत्वते भवति ध्रुवा एवास्मा अनपगाः करोति वायवे नियुत्वत आ लभेत प्रजाकामः प्राणो वै वायुरपानो नियुत् प्राणापानौ खलु वा एतस्य प्रजाया–[ ] **2**

**TS 2.1.1.2 (Padam)**

वायवे । नियुत्वत इति नि – युत्वते । एति । लभेत । ग्रामकाम इति ग्राम – कामः । वायुः । वै । इमाः । प्रजा इति प्र – जाः ।

नस्योता इति नसि – ओताः । नेनीयते । वायुम् । एव ।
नियुत्वन्तमिति नि–युत्वन्तम् । स्वेन । भागधेयेनेति भाग – धेयेन ।
उपेति । धावति । सः । एव । अस्मै । प्रजा इति प्र – जाः ।
नस्योता इति नसि – ओताः । नीति । यच्छति । ग्रामी । एव ।
भवति । नियुत्वत इति नि–युत्वते । भवति । ध्रुवाः । एव । अस्मै ।
अनपगा इत्यनप – गाः । करोति । वायवे । नियुत्वत इति
नि – युत्वते । एति । लभेत । प्रजाकाम इति प्रजा – कामः ।
प्राण इति प्र– अनः । वै । वायुः । अपान इत्यप – अनः ।
नियुदिति नि – युत् । प्राणापानाविति प्राण– अपानौ । खलु । वै ।
एतस्य । प्रजाया इति प्र – जायाः । **2 (50)**

**TS 2.1.1.3**

अप क्रामतो यो ऽलं प्रजायै सन् प्रजां न विन्दते वायुमेव नियुत्वन्त७
स्वेन भागधेयेनोप धावति स एवास्मै प्राणापानाभ्यां प्रजां प्र जनयति
विन्दते प्रजां ँवायवे नियुत्वत आ लभेत ज्योगामयावी प्राणो वै

वायुरपानो नियुत् प्राणापानौ खलु वा एतस्मादप क्रामतो यस्य

ज्योगामयति वायुमेव नियुत्वन्त७ स्वेन भागधेयेनोप – [ ] **3**

**TS 2.1.1.3 (Padam)**

अपेति । क्रामतः । यः । अलम् । प्रजाया इति प्र – जायै । सन्न् ।

प्रजामिति प्र –जाम् । न । विन्दते । वायुम् । एव ।

नियुत्वन्तमिति नि – युत्वन्तम् । स्वेन । भागधेयेनेति भाग–धेयेन ।

उपेति । धावति । सः । एव । अस्मै । प्राणापानाभ्यामिति

प्राण – अपानाभ्याम् । प्रजामिति प्र –जाम् । प्रेति । जनयति ।

विन्दते । प्रजामिति प्र –जाम् । वायवे । नियुत्वत इति नि–युत्वते ।

एति । लभेत । ज्योगामयावीति ज्योक् – आमयावी ।

प्राण इति प्र – अनः । वै । वायुः । अपान इत्यप – अनः ।

नियुदिति नि – युत् । प्राणापानाविति प्राण–अपानौ । खलु । वै ।

एतस्मात् । अपेति । क्रामतः । यस्य । ज्योक् । आमयति । वायुम् ।

एव । नियुत्वन्तमिति नि – युत्वन्तम् । स्वेन ।

भागधेयेनेति भाग–धेयेन । उपेति । **3 (50)**

**TS 2.1.1.4**

धावति स एवास्मिन् प्राणापानौ दधात्युत यदीतासुर्भवति जीवत्येव

प्रजापतिर्वा इदमेक आसीथ् सो ऽकामयत प्रजाः पशून्थ् सृजेयेति

स आत्मनो वपा-मुदक्खिदत् तामग्नौ प्रागृह्णात् ततो ऽजस्तूपरः

समभवत् तꣳ स्वायै देवताया आ ऽलभत ततो वै स प्रजाः

पशूनसृजत यः प्रजाकामः - [ ] **4**

**TS 2.1.1.4 (Padam)**

धावति । सः । एव । अस्मिन्न् । प्राणापानाविति प्राण - अपानौ ।

दधाति । उत । यदि । इतासुरितीत-असुः । भवति । जीवति । एव ।

प्रजापतिरिति प्रजा - पतिः । वै । इदम् । एकः । आसीत् । सः ।

अकामयत । प्रजा इति प्र - जाः । पशून् । सृजेय । इति । सः ।

आत्मनः । वपाम् । उदिति । अक्खिदत् । ताम् । अग्नौ ।

प्रेति । अगृह्णात् । ततः । अजः । तूपरः । समिति । अभवत् । तम् ।

स्वायै । देवतायै । एति । अलभत । ततः । वै । सः ।

प्रजा इति प्र - जाः । पशून् । असृजत । यः ।

प्रजाकाम इति प्रजा - कामः । **4 (50)**

**TS 2.1.1.5**

पशुकामः स्याथ् स एतं प्राजापत्यमजं तूपरमा लभेत प्रजापतिमेव स्वेन भागधेयेनोप धावति स एवास्मै प्रजां पशून् प्र जनयति यच्–छ्मश्रुण–स्तत् पुरुषाणा॑ रूपं ँयत् तूपरस्तदश्वानां ँयदन्यतोदन् तद् गवां ँयदव्या इव शफा–स्तदवीनां ँयदज–स्तदजाना–मेतावन्तो वै ग्राम्याः पशवस्तान् – [ ] **5**

**TS 2.1.1.5 (Padam)**

पशुकाम इति पशु – कामः । स्यात् । सः । एतम् । प्राजापत्यमिति प्राजा – पत्यम् । अजम् । तूपरम् । एति । लभेत । प्रजापतिमिति प्रजा – पतिम् । एव । स्वेन । भागधेयेनेति भाग – धेयेन । उपेति । धावति । सः । एव । अस्मै । प्रजामिति प्र–जाम् । पशून् । प्रेति । जनयति । यत् । श्मश्रुणः । तत् । पुरुषाणाम् । रूपम् । यत् । तूपरः । तत् । अश्वानाम् । यत् । अन्यतोदन्नित्यन्यतः – दन्न् । तत् । गवाम् । यत् । अव्याः । इव । शफाः । तत् । अवीनाम् । यत् । अजः । तत् । अजानाम् । एतावन्तः । वै । ग्राम्याः । पशवः । तान् । **5 (50)**

**TS 2.1.1.6**

रूपेणैवाव रुन्धे सोमापौष्णं त्रैतमा लभेत पशुकामो द्वौ वा अजायै स्तनौ नानैव द्वावभि जायेते ऊर्जं पुष्टिं तृतीयःसोमापूषणावेव स्वेन भागधेयेनोप धावति तावेवास्मै पशून् प्र जनयतः सोमो वै रेतोधाः पूषा पशूनां प्रजनयिता सोम एवास्मै रेतो दधाति पूषा पशून् प्र जनयत्यौदुम्बरो यूपो ( ) भवत्यूर्ग्वा उदुम्बर ऊर्क् पशव ऊर्जैवास्मा ऊर्जं पशूनव रुन्धे ॥ **6**

**TS 2.1.1.6 (Padam)**

रूपेण । एव । अवेति । रुन्धे । सोमापौष्णमिति सोमा – पौष्णम् । त्रैतम् । एति । लभेत । पशुकाम इति पशु – कामः । द्वौ । वै । अजायै । स्तनौ । नाना । एव । द्वौ । अभीति । जायेते इति । ऊर्जम् । पुष्टिम् । तृतीयः । सोमापूषणाविति सोमा – पूषणौ । एव । स्वेन । भागधेयेनेति भाग – धेयेन । उपेति । धावति । तौ । एव । अस्मै । पशून् । प्रेति । जनयतः । सोमः । वै । रेतोधा इति रेतः – धाः । पूषा । पशूनाम् । प्रजनयितेति प्र–जनयिता । सोमः । एव । अस्मै । रेतः । दधाति । पूषा । पशून् । प्रेति । जनयति ।

औदुम्बरः । यूपः ( ) । भवति । ऊर्क् । वै । उदुम्बरः । ऊर्क् ।
पशवः । ऊर्जा । एव । अस्मै । ऊर्जम् । पशून् ।
अवेति । रुन्धे ॥ **6 (63)** ***(अप्रदाहाय भवत्येव – प्रजाया – आमयति वायुमेव नियुत्वन्त७ स्वेन भागधेयेनोप – प्रजाकाम – स्तान् – यूप – स्त्रयोदश च ) (A1)***

**TS 2.1.2.1**

प्रजापतिः प्रजा असृजत ता अस्माथ् सृष्टाः पराची–रायन् ता वरुणमगच्छन् ता अन्वैत् ताः पुनरयाचत ता अस्मै न पुनरददाथ् सो ऽब्रवीद्–वरं ँवृणीष्वाथ मे पुनर्देहीति तासां ँवरमा ऽलभत स कृष्ण एकशितिपा–दभवद्–यो वरुणगृहीतः स्याथ् स एतं ँवारुणं कृष्ण–मेकशितिपादमा लभेत वरुण – [ ] **7**

**TS 2.1.2.1 (Padam)**

प्रजापतिरिति प्रजा – पतिः । प्रजा इति प्र – जाः । असृजत ।
ताः । अस्मात् । सृष्टाः । पराचीः । आयन्न् । ताः । वरुणम् ।
अगच्छन्न् । ताः । अन्विति । ऐत् । ताः । पुनः । अयाचत । ताः ।
अस्मै । न । पुनः । अददात् । सः । अब्रवीत् । वरम् । वृणीष्व ।

अथ । मे । पुनः । देहि । इति । तासाम् । वरम् । एति । अलभत । सः । कृष्णः । एकशितिपादित्येक – शितिपात् । अभवत् । यः । वरुणगृहीत इति वरुण – गृहीतः । स्यात् । सः । एतम् । वारुणम् । कृष्णम् । एकशितिपादमित्येक – शितिपादम् । एति । लभेत । वरुणम् । **7 (50)**

**TS 2.1.2.2**

–मेव स्वेन भागधेयेनोप धावति स एवैनं ँवरुणपाशान् मुञ्चति कृष्ण एकशितिपाद् भवति वारुणो ह्येष देवतया समृद्ध्यै सुवर्भानु–रासुरः सूर्यं तमसा ऽविद्ध्यत ्तस्मै देवाः प्रायश्चित्ति–मैच्छन् तस्य यत् प्रथमं तमो ऽपाघ्नन्थ्सा कृष्णा ऽवि–रभवद्–यद् द्वितीय ँ्सा फल्गुनी यत ्तृतीय ँ्सा बलक्षी यदद्ध्यस्था–दपाकृन्तन्थ्सा ऽविर्वशा – [ ] **8**

**TS 2.1.2.2 (Padam)**

एव । स्वेन । भागधेयेनेति भाग – धेयेन । उपेति । धावति । सः । एव । एनम् । वरुणपाशादिति वरुण – पाशात् । मुञ्चति । कृष्णः । एकशितिपादित्येक – शितिपात् । भवति । वारुणः । हि । एषः ।

देवतया । समृद्ध्या इति सम् - ऋद्ध्यै । सुवर्भानुरिति
सुवः - भानुः । आसुरः । सूर्यम् । तमसा । अविद्ध्यत् । तस्मै ।
देवाः । प्रायश्चित्तिम् । ऐच्छन्न् । तस्य । यत् । प्रथमम् । तमः ।
अपाघ्नन्नित्यप - अघ्नन्न् । सा । कृष्णा । अविः । अभवत् । यत् ।
द्वितीयम् । सा । फल्गुनी । यत् । तृतीयम् । सा । बलक्षी । यत् ।
अद्ध्यस्थादित्यधि - अस्थात् । अपाकृन्तन्नित्यप - अकृन्तन्न् ।
सा । अविः । वशा । **8 (50)**

**<u>TS 2.1.2.3</u>**

समभवत् ते देवा अब्रुवन् देवपशुर्वा अयꣳ समभूत् कस्मा इममा
लफ्स्यामह इत्यथ वै तर्ह्यल्पा पृथिव्यासीदजाता ओषधयस्तामविं
वँशामादित्येभ्यः कामायाऽऽ *लभन्त ततो वा अप्रथत पृथिव्य-
जायन्तौषधयो यः कामयेत प्रथेय पशुभिः प्र प्रजया जायेयेति स
एतामविं वँशामादित्येभ्यः कामायाऽऽ - [ ] **9**

**<u>TS 2.1.2.3 (Padam)</u>**

समिति । अभवत् । ते । देवाः । अब्रुवन्न् । देवपशुरिति
देव-पशुः । वै । अयम् । समिति । अभूत् । कस्मै । इमम् । एति ।

लफ्स्यामहे । इति । अथ । वै । तर्.हि । अल्पा । पृथिवी ।
आसीत् । अजाताः । ओषधयः । ताम् । अविम् । वशाम् ।
आदित्येभ्यः । कामाय । एति । अलभन्त । ततः । वै । अप्रथत ।
पृथिवी । अजायन्त । ओषधयः । यः । कामयेत । प्रथेय ।
पशुभिरिति पशु – भिः । प्रेति । प्रजयेति प्र – जया । जायेय ।
इति । सः । एताम् । अविम् । वशाम् । आदित्येभ्यः ।
कामाय । **9 (50)**

**<u>TS 2.1.2.4</u>**

*लभेताऽऽदित्यानेव काम॑ स्वेन भागधेयेनोप धावति त एवैनं
प्रथयन्ति पशुभिः प्र प्रजया जनयन्त्यसावादित्यो न व्यरोचत तस्मै
देवाः प्रायश्चित्तिमैच्छन् तस्मा एता मल्.हा आ *लभन्ताऽऽग्नेयीं
कृष्णग्रीवी॑ँ स॑ँहितामैन्द्री॑ श्वेतां बार्.हस्पत्यां ताभिरेवास्मिन्
रुचमदधुर्यो ब्रह्मवर्चसकामः स्यात् तस्मा एता मल्.हा
आ लभेता – [ ] **10**

**TS 2.1.2.4 (Padam)**

एति । लभेत । आदित्यान् । एव । कामम् । स्वेन । भागधेयेनेति

भाग – धेयेन । उपेति । धावति । ते । एव । एनम् । प्रथयन्ति ।

पशुभिरिति पशु – भिः । प्रेति । प्रजयेति प्र – जया । जनयन्ति ।

असौ । आदित्यः । न । वीति । अरोचत । तस्मै । देवाः ।

प्रायश्चित्तिम् । ऐच्छन्न् । तस्मै । एताः । मल्.हाः । एति । अलभन्त ।

आग्नेयीम् । कृष्णग्रीवीमिति कृष्ण – ग्रीवीम् । सꣳहितामिति

सं – हिताम् । ऐन्द्रीम् । श्वेताम् । बार्.हस्पत्याम् । ताभिः ।

एव । अस्मिन्न् । रुचम् । अदधुः । यः । ब्रह्मवर्चसकाम इति

ब्रह्मवर्चस – कामः । स्यात् । तस्मै । एताः । मल्.हाः । एति ।

लभेत । **10 (50)**

**TS 2.1.2.5**

ऽऽग्नेयीं कृष्णग्रीवीꣳ सꣳहितामैन्द्रीꣳ श्वेतां बार्.हस्पत्यामेता

एव देवताः स्वेन भागधेयेनोप धावति ता एवास्मिन् ब्रह्मवर्चसं

दधति ब्रह्मवर्चस्येव भवति वसन्ता प्रातराग्नेयीं कृष्ण ग्रीवीमा लभेत

ग्रीष्मे मद्ध्यन्दिने सꣳहितामैन्द्रीꣳ शरद्यपराह्णे श्वेतां बार्.हस्पत्यां

त्रीणि वा आदित्यस्य तेजा(गुं)सि वसन्ता प्रातर्ग्रीष्मे मद्ध्यन्दिने शरद्यपराह्णे यावन्त्येव तेजा(गुं)सि तान्येवा – [ ] 11

**TS 2.1.2.5 (Padam)**

आग्नेयीम् । कृष्णग्रीवीमिति कृष्ण – ग्रीवीम् । स(गुं)हितामिति सं – हिताम् । ऐन्द्रीम् । श्वेताम् । बार्.हस्पत्याम् । एताः । एव । देवताः । स्वेन । भागधेयेनेति भाग–धेयेन । उपेति । धावति । ताः । एव । अस्मिन्न् । ब्रह्मवर्चसमिति ब्रह्म – वर्चसम् । दधति । ब्रह्मवर्चसीति ब्रह्म – वर्चसी । एव । भवति । वसन्ता । प्रातः । आग्नेयीम् । कृष्णग्रीवीमिति कृष्ण – ग्रीवीम् । एति । लभेत । ग्रीष्मे । मद्ध्यन्दिने । स(गुं)हितामिति सं – हिताम् । ऐन्द्रीम् । शरदि । अपराह्ण इत्यपर – अह्ने । श्वेताम् । बार्.हस्पत्याम् । त्रीणि । वै । आदित्यस्य । तेजा(गुं)सि । वसन्ता । प्रातः । ग्रीष्मे । मद्ध्यन्दिने । शरदि । अपराह्ण इत्यपर – अह्ने । यावन्ति । एव । तेजा(गुं)सि । तानि । एव । **11 (50)**

**TS 2.1.2.6**

–व रुन्धे सँवथ्सरं पर्यालभ्यन्ते सँवथ्सरो वै ब्रह्मवर्चसस्य प्रदाता सँवथ्सर एवास्मै ब्रह्मवर्चसं प्र यच्छति ब्रह्मवर्चस्येव भवति गर्भिणयो भवन्तीन्द्रियं ँवै गर्भ इन्द्रियमेवास्मिन् दधति सारस्वतीं मेषीमा लभेत य ईश्वरो वाचो वदितोः सन् वाचं न वदेद्–वाग्वै सरस्वती सरस्वतीमेव स्वेन भागधेयेनोप धावति सैवास्मिन्–[ ] 12

**TS 2.1.2.6 (Padam)**

अवेति । रुन्धे । सँवथ्सरमिति सं – वथ्सरम् ।
पर्यालभ्यन्त इति परि – आलभ्यन्ते । सँवथ्सर इति सं–वथ्सरः ।
वै । ब्रह्मवर्चसस्येति ब्रह्म – वर्चसस्य । प्रदातेति प्र – दाता ।
सँवथ्सर इति सं – वथ्सरः । एव । अस्मै । ब्रह्मवर्चसमिति ब्रह्म – वर्चसम् । प्रेति । यच्छति । ब्रह्मवर्चसीति ब्रह्म – वर्चसी ।
एव । भवति । गर्भिणयः । भवन्ति । इन्द्रियम् । वै । गर्भः ।
इन्द्रियम् । एव । अस्मिन्न् । दधति । सारस्वतीम् । मेषीम् । एति ।
लभेत । यः । ईश्वरः । वाचः । वदितोः । सन्न् । वाचम् । न ।
वदेत् । वाक् । वै । सरस्वती । सरस्वतीम् । एव । स्वेन ।

भागधेयेनेति भाग – धेयेन । उपेति । धावति । सा । एव ।
अस्मिन्न् । **12 (50)**

**TS 2.1.2.7**

वाचं दधाति प्रवदिता वाचो भवत्यपन्नदती भवति तस्मान् मनुष्याः सर्वा ँ वाचं ँ वदन्त्याग्नेयं कृष्णग्रीवमा लभेत सौम्यं बभ्रुं ज्योगामयाव्यग्निं ँ वा एतस्य शरीरं गच्छति सोमꣳ रसो यस्य ज्योगामयत्यग्नेरेवास्य शरीरं निष्क्रीणाति सोमाद् रसमुत यदीतासुर्भवति जीवत्येव सौम्यं बभ्रुमा लभेताऽऽग्नेयं कृष्णग्रीवं प्रजाकामः सोमो – [ ] **13**

**TS 2.1.2.7 (Padam)**

वाचम् । दधाति । प्रवदितेति प्र – वदिता । वाचः । भवति । अपन्नदतीत्यपन्न – दती । भवति । तस्मात् । मनुष्याः । सर्वाम् । वाचम् । वदन्ति । आग्नेयम् । कृष्णग्रीवमिति कृष्ण–ग्रीवम् । एति । लभेत । सौम्यम् । बभ्रुम् । ज्योगामयावीति ज्योक् – आमयावी । अग्निम् । वै । एतस्य । शरीरम् । गच्छति । सोमम् । रसः । यस्य । ज्योक् । आमयति । अग्नेः । एव । अस्य । शरीरम् ।

निष्क्रीणातीति निः – क्रीणाति । सोमात् । रसम् । उत । यदि ।

इतासुरितीत – असुः । भवति । जीवति । एव । सौम्यम् । बभ्रुम् ।

एति । लभेत । आग्नेयम् । कृष्णग्रीवमिति कृष्ण – ग्रीवम् ।

प्रजाकाम इति प्रजा – कामः । सोमः । **13 (50)**

**TS 2.1.2.8**

वै रेतोधा अग्निः प्रजानां प्रजनयिता सोम एवास्मै रेतो दधात्यग्निः

प्रजां प्र जनयति विन्दते प्रजामाग्नेयं कृष्णग्रीवमा लभेत सौम्यं बभ्रुं

ँयो ब्राह्मणो विद्यामनूच्य न विरोचेत यदाग्नेयो भवति तेज एवास्मिन्

तेन दधाति यथ् सौम्यो ब्रह्मवर्चसं तेन कृष्णग्रीव आग्नेयो भवति

तम एवास्मादप हन्ति श्वेतो भवति – [ ] **14**

**TS 2.1.2.8 (Padam)**

वै । रेतोधा इति रेतः – धाः । अग्निः । प्रजानामिति प्र – जानाम् ।

प्रजनयितेति प्र–जनयिता । सोमः । एव । अस्मै । रेतः । दधाति ।

अग्निः । प्रजामिति प्र–जाम् । प्रेति । जनयति । विन्दते ।

प्रजामिति प्र–जाम् । आग्नेयम् । कृष्णग्रीवमिति कृष्ण – ग्रीवम् ।

एति । लभेत । सौम्यम् । बभ्रुम् । यः । ब्राह्मणः । विद्याम् ।

अनूच्येत्यनु – उच्य । न । विरोचेतेति वि – रोचेत । यत् ।

आग्नेयः । भवति । तेजः । एव । अस्मिन्न् । तेन । दधाति । यत् ।

सौम्यः । ब्रह्मवर्चसमिति ब्रह्म – वर्चसम् । तेन ।

कृष्णग्रीव इति कृष्ण – ग्रीवः । आग्नेयः । भवति । तमः ।

एव । अस्मात् । अपेति । हन्ति । श्वेतः । भवति । **14 (50)**

**TS 2.1.2.9**

रुचमेवास्मिन् दधाति बभ्रुः सौम्यो भवति ब्रह्मवर्चसमेवास्मिन् त्विषिं

दधात्याग्नेयं कृष्णग्रीवमा लभेत सौम्यं बभ्रुमाग्नेयं कृष्णग्रीवं

पुरोधाया७ स्पर्द्धमान आग्नेयो वै ब्राह्मणः सौम्यो राजन्यो ऽभितः

सौम्यमाग्नेयौ भवत–स्तेजसैव ब्रह्मणोभयतो राष्ट्रं परि गृह्णात्येकधा

समा वृङ्क्ते पुर एनं दधते ॥ **15**

**TS 2.1.2.9 (Padam)**

रुचम् । एव । अस्मिन्न् । दधाति । बभ्रुः । सौम्यः । भवति ।

ब्रह्मवर्चसमिति ब्रह्म – वर्चसम् । एव । अस्मिन्न् । त्विषिम् ।

दधाति । आग्नेयम् । कृष्णग्रीवमिति कृष्ण – ग्रीवम् । एति ।

लभेत । सौम्यम् । बभ्रुम् । आग्नेयम् ।

कृष्णग्रीवमिति कृष्ण – ग्रीवम् । पुरोधायामिति पुरः – धायाम् ।

स्पर्द्धमानः । आग्नेयः । वै । ब्राह्मणः । सौम्यः । राजन्यः ।

अभितः । सौम्यम् । आग्नेयौ । भवतः । तेजसा । एव । ब्रह्मणा ।

उभयतः । राष्ट्रम् । परीति । गृह्णाति । एकधेत्येक – धा ।

समावृङ्क्त इति सं – आवृङ्क्ते । पुरः । एनम् । दधते ॥ **15 (43)**

**(लभेत वरुणं – वँशौ – तामविं वँशामादित्येभ्यः कामाय –**

***मल्.हा आ लभेत – तान्येव – सैवास्मिन्थ् – सोमः – स्वेतो***

***भवति – त्रिचत्वारिँ॑शच्च ) (A2)***

**TS 2.1.3.1**

देवासुरा एषु लोकेष्वस्पर्द्धन्त स एतं वँिष्णुर्वामनमपश्यत्

तँ॑ स्वायै देवताया आ ऽलभत ततो वै स इमान् ल्ँलोकानभ्यजयद्

वैष्णवं वँामनमा लभेत स्पर्द्धमानो विष्णुरेव भूत्वेमान् ल्ँलोकानभि

जयति विषम आ लभेत विषमा इव हीमे लोकाः समृद्ध्या इन्द्राय

मन्युमते मनस्वते ललामं प्राशृङ्गमा लभेत संग्रामे – [ ] **16**

**TS 2.1.3.1 (Padam)**

देवासुरा इति देव – असुराः । एषु । लोकेषु । अस्पर्द्धन्त । सः ।
एतम् । विष्णुः । वामनम् । अपश्यत् । तम् । स्वायै । देवतायै ।
एति । अलभत । ततः । वै । सः । इमान् । लोकान् । अभीति ।
अजयत् । वैष्णवम् । वामनम् । एति । लभेत । स्पर्द्धमानः ।
विष्णुः । एव । भूत्वा । इमान् । लोकान् । अभीति । जयति ।
विषम इति वि – समे । एति । लभेत । विषमा इति वि – समाः ।
इव । हि । इमे । लोकाः । समृद्ध्या इति सं – ऋद्ध्यै । इन्द्राय ।
मन्युमत इति मन्यु – मते । मनस्वते । ललामम् । प्राशृङ्गम् । एति ।
लभेत । सङ्ग्राम इति सं – ग्रामे । **16 (50)**

**TS 2.1.3.2**

सँयत्त इन्द्रियेण वै मन्युना मनसा संग्रामं जयतीन्द्रमेव मन्युमन्तं
मनस्वन्तꣳ स्वेन भागधेयेनोप धावति स एवास्मिन्निन्द्रियं मन्युं मनो
दधाति जयति तꣳ संग्राममिन्द्राय मरुत्वते पृश्ञिनसक्थमा लभेत
ग्रामकाम इन्द्रमेव मरुत्वन्तꣳ स्वेन भागधेयेनोप धावति स एवास्मै
सजातान् प्र यच्छति ग्राम्येव भवति यदृषभस्तेनै – [ ] **17**

**TS 2.1.3.2 (Padam)**

सँयत्त इति सं – यत्ते । इन्द्रियेण । वै । मन्युना । मनसा ।

सङ्ग्राममिति सं – ग्रामम् । जयति । इन्द्रम् । एव ।

मन्युमन्तमिति मन्यु – मन्तम् । मनस्वन्तम् । स्वेन ।

भागधेयेनेति भाग – धेयेन । उपेति । धावति । सः । एव ।

अस्मिन्न् । इन्द्रियम् । मन्युम् । मनः । दधाति । जयति । तम् ।

सङ्ग्राममिति सं – ग्रामम् । इन्द्राय । मरुत्वते ।

पृश्ञिसक्थमिति पृश्ञि – सक्थम् । एति । लभेत ।

ग्रामकाम इति ग्राम – कामः । इन्द्रम् । एव । मरुत्वन्तम् ।

स्वेन । भागधेयेनेति भाग – धेयेन । उपेति । धावति । सः ।

एव । अस्मै । सजातानिति स – जातान् । प्रेति । यच्छति । ग्रामी ।

एव । भवति । यत् । ऋषभः । तेन । **17 (50)**

**TS 2.1.3.3**

–न्द्रो यत् पृश्ञिस्तेन मारुतः समृद्ध्यै पश्चात् पृश्ञिसक्थो भवति

पश्चादन्ववसायिनी–मेवास्मै विशं करोति सौम्यं बभ्रुमा

लभेतान्नकामः सौम्यं ँवा अन्न७ं सोममेव स्वेन भागधेयेनोप धावति

स एवास्मा अन्नं प्र यच्छत्यन्नाद एव भवति बभ्रुर्भवत्येतद्वा अन्नस्य रूप॒ꣳ समृद्ध्यै सौम्यं बभ्रुमा लभेत यमल॒ꣳ – [ ] **18**

**TS 2.1.3.3 (Padam)**

ऐन्द्रः । यत् । पृश्ञिः । तेन । मारुतः । समृद्ध्या इति सं–ऋद्ध्यै । पश्चात् । पृश्ञिसक्थ इति पृश्ञि – सक्थः । भवति । पश्चादन्ववसायिनीमिति पश्चात् – अन्ववसायिनीम् । एव । अस्मै । विशम् । करोति । सौम्यम् । बभ्रुम् । एति । लभेत । अन्नकाम इत्यन्न – कामः । सौम्यम् । वै । अन्नम् । सोमम् । एव । स्वेन । भागधेयेनेति भाग – धेयेन । उपेति । धावति । सः । एव । अस्मै । अन्नम् । प्रेति । यच्छति । अन्नाद इत्यन्न – अदः । एव । भवति । बभ्रुः । भवति । एतत् । वै । अन्नस्य । रूपम् । समृद्ध्या इति सं – ऋद्ध्यै । सौम्यम् । बभ्रुम् । एति । लभेत । यम् । अलम् । **18 (50)**

**TS 2.1.3.4**

राज्याय सन्त॒ꣳ राज्यं नोपनमेथ् सौम्यं ँवै राज्य॒ꣳ सोममेव स्वेन भागधेयेनोप धावति स एवास्मै राज्यं प्र यच्छत्युपैन॒ꣳ राज्यं नमति

बभ्रुर्भवत्येतद् वै सोमस्य रूप७ं समृद्ध्या इन्द्राय वृत्रतुरे ललामं प्राशृङ्गमा लभेत गतश्रीः प्रतिष्ठाकामः पाप्मानमेव वृत्रं तीर्त्वा प्रतिष्ठां गच्छतीन्द्रायाभिमातिघ्ने ललामं प्राशृङ्गमा – [ ] **19**

**TS 2.1.3.4 (Padam)**

राज्याय । सन्तम् । राज्यम् । न । उपनमेदित्युप–नमेत् । सौम्यम् । वै । राज्यम् । सोमम् । एव । स्वेन । भागधेयेनेति भाग – धेयेन । उपेति । धावति । सः । एव । अस्मै । राज्यम् । प्रेति । यच्छति । उपेति । एनम् । राज्यम् । नमति । बभ्रुः । भवति । एतत् । वै । सोमस्य । रूपम् । समृद्ध्या इति सं – ऋद्ध्यै । इन्द्राय । वृत्रतुर इति वृत्र – तुरे । ललामम् । प्राशृङ्गम् । एति । लभेत । गतश्रीरिति गत – श्रीः । प्रतिष्ठाकाम इति प्रतिष्ठा – कामः । पाप्मानम् । एव । वृत्रम् । तीर्त्वा । प्रतिष्ठामिति प्रति – स्थाम् । गच्छति । इन्द्राय । अभिमातिघ्न इत्यभिमाति – घ्ने । ललामम् । प्राशृङ्गम् । एति । **19 (50)**

**TS 2.1.3.5**

लभेत यः पाप्मना गृहीतः स्यात् पाप्मा वा अभिमाति–

रिन्द्रमेवाभिमातिहनꣳ स्वेन भागधेयेनोप धावति स एवास्मात्

पाप्मानमभिमातिं प्र णुदत इन्द्राय वज्रिणे ललामं प्राशृङ्गमा लभेत

यमलꣳ राज्याय सन्तꣳ राज्यं नोपनमेदिन्द्रमेव वज्रिणꣳ स्वेन

भागधेयेनोप धावति स एवास्मै वज्रं प्र यच्छति स एनं ( ) वँज्रो

भूत्वा इन्ध उपैनꣳ राज्यं नमति ललामः प्राशृङ्गो भवत्येतद्–वै

वज्रस्य रूपꣳ समृद्ध्यै ॥ **20**

**TS 2.1.3.5 (Padam)**

लभेत । यः । पाप्मना । गृहीतः । स्यात् । पाप्मा । वै ।

अभिमातिरित्यभि – मातिः । इन्द्रम् । एव ।

अभिमातिहनमित्यभिमाति – हनम् । स्वेन । भागधेयेनेति

भाग – धेयेन । उपेति । धावति । सः । एव । अस्मात् । पाप्मानम् ।

अभिमातिमित्यभि – मातिम् । प्रेति । नुदते । इन्द्राय । वज्रिणे ।

ललामम् । प्राशृङ्गम् । एति । लभेत । यम् । अलम् । राज्याय ।

सन्तम् । राज्यम् । न । उपनमेदित्युप – नमेत् । इन्द्रम् । एव ।

वज्रिणम् । स्वेन । भागधेयेनेति भाग – धेयेन । उपेति । धावति ।
सः । एव । अस्मै । वज्रम् । प्रेति । यच्छति । सः । एनम् ( ) ।
वज्रः । भूत्यै । इन्धे । उपेति । एनम् । राज्यम् । नमति । ललामः ।
प्राशृङ्गः । भवति । एतत् । वै । वज्रस्य । रूपम् ।
समृद्ध्या इति सं – ऋद्ध्यै ॥ **20 (65)**

***(संग्रामे – तेना – ल – मभिमातिघ्ने ललामं प्राशृङ्गमै – नं – पञ्चदश च ) (A3)***

**TS 2.1.4.1**

असावादित्यो न व्यरोचत तस्मै देवाः प्रायश्चित्तिमैच्छन् तस्मा एतां दशर्.षभामा ऽलभन्त तयैवास्मिन् रुचमदधुर्यो ब्रह्मवर्चसकामः स्यात् तस्मा एतां दशर्.षभामा ऽलभेतामुमेवाऽऽदित्य७ स्वेन भागधेयेनोप धावति स एवास्मिन् ब्रह्मवर्चसं दधाति ब्रह्मवर्चस्येव भवति वसन्ता प्रातस्त्रीन् ँललामाना लभेत ग्रीष्मे मद्ध्यन्दिने – [ ] **21**

**TS 2.1.4.1 (Padam)**

असौ । आदित्यः । न । वीति । अरोचत । तस्मै । देवाः ।
प्रायश्चित्तिम् । ऐच्छन्न् । तस्मै । एताम् । दशर्.षभामिति

दश – ऋषभाम् । एति । अलभन्त । तया । एव । अस्मिन्न् ।
रुचम् । अदधुः । यः । ब्रह्मवर्चसकाम इति ब्रह्मवर्चस – कामः ।
स्यात् । तस्मै । एताम् । दशर्.षभामिति दश – ऋषभाम् । एति ।
लभेत । अमुम् । एव । आदित्यम् । स्वेन । भागधेयेनेति
भाग – धेयेन । उपेति । धावति । सः । एव । अस्मिन्न् ।
ब्रह्मवर्चसमिति ब्रह्म – वर्चसम् । दधाति ।
ब्रह्मवर्चसीति ब्रह्म – वर्चसी । एव । भवति । वसन्ता । प्रातः ।
त्रीन् । ललामान् । एति । लभेत । ग्रीष्मे । मद्ध्यन्दिने । **21 (50)**

**TS 2.1.4.2**

त्रीञ्छितिपृष्ठाञ्छरद्यपराह्णे त्रीञ्छितिवारान् त्रीणि वा आदित्यस्य
तेजाꣳसि वसन्ता प्रातर्ग्रीष्मे मद्ध्यन्दिने शरद्यपराह्णे यावन्त्येव
तेजाꣳसि तान्येवाव रुन्धे त्रयस्त्रय आ लभ्यन्ते ऽभिपूर्वमेवास्मिन्
तेजो दधाति सँवथ्सरं पर्यालभ्यन्ते सँवथ्सरो वै ब्रह्मवर्चसस्य
प्रदाता सँवथ्सर एवास्मै ब्रह्मवर्चसं प्र यच्छति ब्रह्मवर्चस्येव भवति
सँवथ्सरस्य परस्तात् प्राजापत्यं कद्रु – [ ] **22**

**TS 2.1.4.2 (Padam)**

त्रीन् । शितिपृष्ठानिति शिति – पृष्ठान् । शरदि । अपराह्ण इत्यपर–अह्ने । त्रीन् । शितिवारानिति शिति – वारान् । त्रीणि । वै । आदित्यस्य । तेजा<sup></sup>ꣳसि । वसन्ता । प्रातः । ग्रीष्मे । मद्ध्यन्दिने । शरदि । अपराह्ण इत्यपर–अह्ने । यावन्ति । एव । तेजाꣳसि । तानि । एव । अवेति । रुन्धे । त्रयस्त्रय इति त्रयः–त्रयः । एति । लभ्यन्ते । अभिपूर्वमित्यभि – पूर्वम् । एव । अस्मिन्न् । तेजः । दधाति । सँवथ्सरमिति सं – वथ्सरम् । पर्यालभ्यन्त इति परि–आलभ्यन्ते । सँवथ्सर इति सं – वथ्सरः । वै । ब्रह्मवर्चसस्येति ब्रह्म – वर्चसस्य । प्रदातेति प्र – दाता । सँवथ्सर इति सं – वथ्सरः । एव । अस्मै । ब्रह्मवर्चसमिति ब्रह्म – वर्चसम् । प्रेति । यच्छति । ब्रह्मवर्चसीति ब्रह्म – वर्चसी । एव । भवति । सँवथ्सरस्येति सं – वथ्सरस्य । परस्तात् । प्राजापत्यमिति प्राजा – पत्यम् । कद्रुम् । **22 (50)**

**TS 2.1.4.3**

–मा लभेत प्रजापतिः सर्वा देवता देवतास्वेव प्रति तिष्ठति यदि बिभीयाद् दुश्चर्मा भविष्यामीति सोमापौष्ण७ श्याममा लभेत सौम्यो वै देवतया पुरुषः पौष्णाः पशवः स्वयैवास्मै देवतया पशुभिस्त्वचं करोति न दुश्चर्मा भवति देवाश्च वै यमश्चास्मिन् ँल्लोके ऽस्पर्द्धन्त स यमो देवानामिन्द्रियं ँवीर्यमयुवत तद् यमस्य – [ ] **23**

**TS 2.1.4.3 (Padam)**

एति । लभेत । प्रजापतिरिति प्रजा – पतिः । सर्वाः । देवताः । देवतासु । एव । प्रतीति । तिष्ठति । यदि । बिभीयात् । दुश्चर्मेति दुः–चर्मा । भविष्यामि । इति । सोमापौष्णमिति सोमा – पौष्णम् । श्यामम् । एति । लभेत । सौम्यः । वै । देवतया । पुरुषः । पौष्णाः । पशवः । स्वया । एव । अस्मै । देवतया । पशुभिरिति पशु – भिः । त्वचम् । करोति । न । दुश्चर्मेति दुः – चर्मा । भवति । देवाः । च । वै । यमः । च । अस्मिन्न् । लोके । अस्पर्धन्त । सः । यमः । देवानाम् । इन्द्रियम् । वीर्यम् । अयुवत । तत् । यमस्य । **23 (50)**

**TS 2.1.4.4**

यमत्वं ते देवा अमन्यन्त यमो वा इदमभूद्–यद्–वय७ स्म इति

ते प्रजापतिमुपाधावन्थ् स एतौ प्रजापतिरात्मन उक्षवशौ निरमिमीत

ते देवा वैष्णावरुणीं ँवशामा ऽलभन्तैन्द्रमुक्षाणंतं ँवरुणेनैव

ग्राहयित्वा विष्णुना यज्ञेन प्राणुदन्तैन्द्रेणै–वास्येन्द्रियम–वृञ्जत यो

भ्रातृव्यवान्थ् स्याथ् स स्पर्द्धमानो वैष्णावरुणीं – [ ] **24**

**TS 2.1.4.4 (Padam)**

यमत्वमिति यम – त्वम् । ते । देवाः । अमन्यन्त । यमः । वै ।

इदम् । अभूत् । यत् । वयम् । स्मः । इति । ते ।

प्रजापतिमिति प्रजा – पतिम् । उपेति । अधावन्न् । सः । एतौ ।

प्रजापतिरिति प्रजा – पतिः । आत्मनः । उक्षवशावित्युक्ष – वशौ ।

निरिति । अमिमीत । ते । देवाः । वैष्णावरुणीमिति वैष्णा–वरुणीम् ।

वशाम् । एति । अलभन्त । ऐन्द्रम् । उक्षाणम् । तम् । वरुणेन ।

एव । ग्राहयित्वा । विष्णुना । यज्ञेन । प्रेति । अनुदन्त । ऐन्द्रेण ।

एव । अस्य । इन्द्रियम् । अवृञ्जत । यः ।

भ्रातृव्यवानिति भ्रातृव्य – वान् । स्यात् । सः । स्पर्द्धमानः ।

वैष्णावरुणीमिति वैष्णा – वरुणीम् । **24 (50)**

**TS 2.1.4.5**

वँशामा लभेतैन्द्रमुक्षाणं वँरुणेनैव भ्रातृव्यं ग्राहयित्वा विष्णुना यज्ञेन प्र णुदत ऐन्द्रेणैवास्येन्द्रियं वृँङ्क्ते भवत्यात्मना परा ऽस्य भ्रातृव्यो भवतीन्द्रो वृत्रमहन् तं वृँत्रो हतः षोडशभि–र्भोगैरसिनात् तस्य वृत्रस्य शीर्.षतो गाव उदायन् ता वैदेह्यो ऽभवन् तासामृषभो जघने ऽनूदैत् तमिन्द्रो – [ ] **25**

**TS 2.1.4.5 (Padam)**

वशाम् । एति । लभेत । ऐन्द्रम् । उक्षाणम् । वरुणेन । एव । भ्रातृव्यम् । ग्राहयित्वा । विष्णुना । यज्ञेन । प्रेति । नुदते । ऐन्द्रेण । एव । अस्य । इन्द्रियम् । वृङ्क्ते । भवति । आत्मना । परेति । अस्य । भ्रातृव्यः । भवति । इन्द्रः । वृत्रम् । अहन्न् । तम् । वृत्रः । हतः । षोडशभिरिति षोडश – भिः । भोगैः । असिनात् । तस्य । वृत्रस्य । शीर्.षतः । गावः । उदिति । आयन्न् । ताः ।

वैदेह्यः । अभवन्न् । तासाम् । ऋषभः । जघने । अनु । उदिति ।
ऐत् । तम् । इन्द्रः । 25 (50)

**TS 2.1.4.6**

ऽचायथ् सो ऽमन्यत यो वा इममालभेत मुच्येतास्मात् पाप्मन इति
स आग्नेयं कृष्णग्रीवमा लभतैन्द्रमृषभं तस्याग्निरेव स्वेन
भागधेयेनोप सृतः षोडशधा वृत्रस्य भोगानप्यदहदैन्द्रेणेन्द्रिय–
मात्मन्नधत्त यः पाप्मना गृहीतः स्याथ् स आग्नेयं कृष्णग्रीवमा
लभेतैन्द्रमृषभ–मग्निरेवास्य स्वेन भागधेयेनोपसृतः – [ ] 26

**TS 2.1.4.6 (Padam)**

अचायत् । सः । अमन्यत । यः । वै । इमम् ।
आलभेतेत्या – लभेत । मुच्येत । अस्मात् । पाप्मनः । इति । सः ।
आग्नेयम् । कृष्णग्रीवमिति कृष्ण – ग्रीवम् । एति । अलभत ।
ऐन्द्रम् । ऋषभम् । तस्य । अग्निः । एव । स्वेन । भागधेयेनेति
भाग – धेयेन । उपसृत इत्युप – सृतः । षोडशधेति षोडश–धा ।
वृत्रस्य । भोगान् । अपीति । अदहत् । ऐन्द्रेण । इन्द्रियम् ।
आत्मन्न् । अधत्त । यः । पाप्मना । गृहीतः । स्यात् । सः ।

आग्नेयम् । कृष्णग्रीवमिति कृष्ण – ग्रीवम् । एति । लभेत ।

ऐन्द्रम् । ऋषभम् । अग्निः । एव । अस्य । स्वेन ।

भागधेयेनेति भाग – धेयेन । उपसृत इत्युप – सृतः । **26 (50)**

**TS 2.1.4.7**

पाप्मानमपि दहत्यैन्द्रेणेन्द्रियमात्मन् धत्ते मुच्यते पाप्मनो

भवत्येव द्यावापृथिव्यां धेनुमा लभेत ज्योगपरुद्धो ऽनयोर्. हि वा

एषो ऽप्रतिष्ठितो ऽथैष ज्योगपरुद्धो द्यावापृथिवी एव स्वेन भागधेयेनोप

धावति ते एवैनं प्रतिष्ठां गमयतः प्रत्येव तिष्ठति पर्यारिणी भवति

पर्यारीव ह्येतस्य राष्ट्रं ँयो ज्योगपरुद्धः समृद्ध्यै वायव्यं – [ ] **27**

**TS 2.1.4.7 (Padam)**

पाप्मानम् । अपीति । दहति । ऐन्द्रेण । इन्द्रियम् । आत्मन्न् । धत्ते ।

मुच्यते । पाप्मनः । भवति । एव । द्यावापृथिव्यामिति

द्यावा – पृथिव्याम् । धेनुम् । एति । लभेत । ज्योगपरुद्ध इति

ज्योक् – अपरुद्धः । अनयोः । हि । वै । एषः ।

अप्रतिष्ठित इत्यप्रति – स्थितः । अथ । एषः । ज्योक् ।

अपरुद्ध इत्यप – रुद्धः । द्यावापृथिवी इति द्यावा – पृथिवी ।

एव । स्वेन । भागधेयेनेति भाग – धेयेन । उपेति । धावति ।
ते इति । एव । एनम् । प्रतिष्ठामिति प्रति – स्थाम् । गमयतः ।
प्रतीति । एव । तिष्ठति । पर्यारिणी । भवति । पर्यारि । इव ।
हि । एतस्य । राष्ट्रम् । यः । ज्योगपरुद्ध इति ज्योक् – अपरुद्धः ।
समृद्ध्या इति सं – ऋद्ध्यै । वायव्यम् । **27 (50)**

**TS 2.1.4.8**

ँवथ्समा लभेत वायुर्वा अनयोर्वथ्स इमे वा एतस्मै लोका अपशुष्का
विडपशुष्का ऽथैष ज्योगपरुद्धो वायुमेव स्वेन भागधेयेनोप धावति
स एवास्मा इमान् ँलोकान्. विशं प्र दापयति प्रास्मा इमे लोकाः
स्नुवन्तिभुञ्जत्येनं ँविडुप तिष्ठते ॥ **28**

**TS 2.1.4.8 (Padam)**

वथ्सम् । एति । लभेत । वायुः । वै । अनयोः । वथ्सः । इमे ।
वै । एतस्मै । लोकाः । अपशुष्का इत्यप – शुष्काः । विट् ।
अपशुष्केत्यप – शुष्का । अथ । एषः । ज्योक् ।
अपरुद्ध इत्यप – रुद्धः । वायुम् । एव । स्वेन ।
भागधेयेनेति भाग – धेयेन । उपेति । धावति । सः । एव ।

अस्मै । इमान् । लोकान् । विशम् । प्रेति । दापयति । प्रेति ।

अस्मै । इमे । लोकाः । स्नुवन्ति । भुञ्जती । एनम् । विट् ।

उपेति । तिष्ठते ॥ **28 (42)** ***(मध्यन्दिने – कद्रुं – यँमस्य – स्पर्धमानो वैष्णावरुणीं –तमिन्द्रो – ऽस्य स्वेन भागधेयेनोपसृतो – वायव्यं – द्विचत्वारिꣳशच्च) (A4)***

**TS 2.1.5.1**

इन्द्रो वलस्य बिलमपौर्णोथ् स य उत्तमः पशुरासीत् तं पृष्ठं प्रति संगृह्योदक्खिदत् तꣳ सहस्रं पशवो ऽनूदायन्थ् स उन्नतो ऽभवद् यः पशुकामः स्याथ् स एतमैन्द्रमुन्नतमा लभेतेन्द्रमेव स्वेन भागधेयेनोप धावति स एवास्मै पशून् प्र यच्छति पशुमानेव भवत्युन्नतो –[ ] **29**

**TS 2.1.5.1 (Padam)**

इन्द्रः । वलस्य । बिलम् । अपेति । और्णोत् । सः । यः ।

उत्तम इत्युत् – तमः । पशुः । आसीत् । तम् । पृष्ठम् ।

प्रतीति । संगृह्येति सं – गृह्य । उदिति । अक्खिदत् । तम् ।

सहस्रम् । पशवः । अनु । उदिति । आयन्न् । सः ।

उन्नत इत्युत् – नतः । अभवत् । यः । पशुकाम इति पशु–कामः ।

स्यात् । सः । एतम् । ऐन्द्रम् । उन्नतमित्युत्–नतम् । एति । लभेत ।

इन्द्रम् । एव । स्वेन । भागधेयेनेति भाग – धेयेन । उपेति ।

धावति । सः । एव । अस्मै । पशून् । प्रेति । यच्छति ।

पशुमानिति पशु – मान् । एव । भवति ।

उन्नत इत्युत् – नतः । **29 (49)**

**TS 2.1.5.2**

भवति साहस्री वा एषा लक्ष्मी यदुन्नतो लक्ष्मियैव पशूनव रुन्धे

यदा सहस्रं पशून् प्राप्नुयादथ वैष्णवं वामनमा लभेतैतस्मिन्

वै तथ् सहस्रमदध्यतिष्ठत् तस्मादेष वामनः समीषितः पशुभ्य एव

प्रजातेभ्यः प्रतिष्ठां दधाति को ऽर्.हति सहस्रं पशून् प्राप्तुमित्याहु–

रहोरात्राण्येव सहस्रꣳ सम्पाद्याऽऽ लभेत पशवो – [ ] **30**

**TS 2.1.5.2 (Padam)**

भवति । साहस्री । वै । एषा । लक्ष्मी । यत् । उन्नत इत्युत् – नतः ।

लक्ष्मिया । एव । पशून् । अवेति । रुन्धे । यदा । सहस्रम् । पशून् ।

प्राप्नुयादिति प्र – आप्नुयात् । अथ । वैष्णवम् । वामनम् । एति ।

लभेत । एतस्मिन्न् । वै । तत् । सहस्रम् । अधीति । अतिष्ठत् ।

तस्मात् । एषः । वामनः । समीषित इति सं – ईषितः ।

पशुभ्य इति पशु – भ्यः । एव । प्रजातेभ्य इति प्र – जातेभ्यः ।

प्रतिष्ठामिति प्रति – स्थाम् । दधाति । कः । अर्.हति ।

सहस्रम् । पशून् । प्राप्तुमिति प्र – आप्तुम् । इति । आहुः ।

अहोरात्राणीत्यहः – रात्राणि । एव । सहस्रम् ।

सम्पाद्येति सं – पाद्य । एति । लभेत । पशवः । **30 (50)**

**<u>TS 2.1.5.3</u>**

वा अहोरात्राणि पशूनेव प्रजातान् प्रतिष्ठां गमयत्योषधीभ्यो वेहतमा

लभेत प्रजाकाम ओषधयो वा एतं प्रजायै परि बाधन्ते यो ऽलं प्रजायै

सन् प्रजां न विन्दत ओषधयः खलु वा एतस्यै सूतुमपि घ्नन्ति या

वेहद्–भवत्योषधीरेव स्वेन भागधेयेनोप धावति ता एवास्मै

स्वाद्योनेः प्रजां प्र जनयन्ति विन्दते – [ ] **31**

**<u>TS 2.1.5.3 (Padam)</u>**

वै । अहोरात्राणीत्यहः – रात्राणि । पशून् । एव । प्रजातानिति

प्र – जातान् । प्रतिष्ठामिति प्रति – स्थाम् । गमयति ।

ओषधीभ्य इत्योषधि – भ्यः । वेहतम् । एति । लभेत ।

प्रजाकाम इति प्रजा – कामः । ओषधयः । वै । एतम् । प्रजाया इति प्र – जायै । परीति । बाधन्ते । यः । अलम् । प्रजाया इति प्र – जायै । सन्न् । प्रजामिति प्र–जाम् । न । विन्दते । ओषधयः । खलु । वै । एतस्यै । सूतुम् । अपीति । घ्नन्ति । या । वेहत् । भवति । ओषधीः । एव । स्वेन । भागधेयेनेति भाग – धेयेन । उपेति । धावति । ताः । एव । अस्मै । स्वात् । योनेः । प्रजामिति प्र – जाम् । प्रेति । जनयन्ति । विन्दते । **31(50)**

**TS 2.1.5.4**

प्रजामापो वा ओषधयो ऽसत् पुरुष आप एवास्मा असतः सद्ददति तस्मादाहुर्यश्चैवं ँवेद यश्च नापस्त्वावासतः सद्ददतीत्यैन्द्रीं॒ सूतवशामा लभेत भूतिकामो ऽजातो वा एष यो ऽलं भूत्यै सन् भूतिं न प्राप्नोतीन्द्रं खलु वा एषा सूत्वा वशा ऽभव – [ ] **32**

**TS 2.1.5.4 (Padam)**

प्रजामिति प्र – जाम् । आपः । वै । ओषधयः । असत् । पुरुषः । आपः । एव । अस्मै । असतः । सत् । ददति । तस्मात् । आहुः । यः । च । एवम् । वेद । यः । च । न । आपः । तु । वाव ।

असतः । सत् । ददति । इति । ऐन्द्रीम् । सूतवशामिति

सूत – वशाम् । एति । लभेत । भूतिकाम इति भूति – कामः ।

अजातः । वै । एषः । यः । अलम् । भूत्यै । सन्न् । भूतिम् । न ।

प्राप्नोतीति प्र – आप्नोति । इन्द्रम् । खलु । वै । एषा । सूत्वा ।

वशा । अभवत् । **32 (50)**

**TS 2.1.5.5**

–दिन्द्रमेव स्वेन भागधेयेनोप धावति स एवैनं भूतिं गमयति

भवत्येव यꣳ सूत्वा वशा स्यात् तमैन्द्रमेवाऽऽ लभेतैतद् वाव

तदिन्द्रियꣳ साक्षादेवेन्द्रियमव रुन्ध ऐन्द्राग्नं पुनरुथ् सृष्टमा लभेत

य आ तृतीयात् पुरुषाथ् सोमं न पिबेद्–विच्छिन्नो वा एतस्य

सोमपीथो यो ब्राह्मणः सन्नाऽऽ – [ ] **33**

**TS 2.1.5.5 (Padam)**

इन्द्रम् । एव । स्वेन । भागधेयेनेति भाग – धेयेन । उपेति ।

धावति । सः । एव । एनम् । भूतिम् । गमयति । भवति । एव ।

यम् । सूत्वा । वशा । स्यात् । तम् । ऐन्द्रम् । एव । एति । लभेत ।

एतत् । वाव । तत् । इन्द्रियम् । साक्षादिति स – अक्षात् । एव ।

इन्द्रियम् । अवेति । रुन्धे । ऐन्द्राग्नमित्यैन्द्र - अग्नम् ।

पुनरुथ्सृष्टमिति पुनः - उथ्सृष्टम् । एति । लभेत । यः ।

एति । तृतीयात् । पुरुषात् । सोमम् । न । पिबेत् ।

विच्छिन्न इति वि - छिन्नः । वै । एतस्य । सोमपीथ इति

सोम - पीथः । यः । ब्राह्मणः । सन्न् । एति । **33 (50)**

**<u>TS 2.1.5.6</u>**

तृतीयात् पुरुषाथ् सोमं न पिबतीन्द्राग्नी एव स्वेन भागधेयेनोप

धावति तावेवास्मै सोमपीथं प्र यच्छत उपैनꣳ सोमपीथो नमति

यदैन्द्रो भवतीन्द्रियं ँवै सोमपीथ इन्द्रियमेव सोमपीथमव रुन्धे

यदाग्नेयो भवत्याग्नेयो वै ब्राह्मणः स्वामेव देवतामनु सम् तनोति

पुनरुथ्सृष्टो भवति पुनरुथ्सृष्ट इव ह्येतस्य - [ ] **34**

**<u>TS 2.1.5.6 (Padam)</u>**

तृतीयात् । पुरुषात् । सोमम् । न । पिबति । इन्द्राग्नी

इतीन्द्र - अग्नी । एव । स्वेन । भागधेयेनेति भाग-धेयेन । उपेति ।

धावति । तौ । एव । अस्मै । सोमपीथमिति सोम - पीथम् । प्रेति ।

यच्छतः । उपेति । एनम् । सोमपीथ इति सोम - पीथः । नमति ।

यत् । ऐन्द्रः । भवति । इन्द्रियम् । वै । सोमपीथ इति सोम–पीथः ।
इन्द्रियम् । एव । सोमपीथमिति सोम – पीथम् । अवेति । रुन्धे ।
यत् । आग्नेयः । भवति । आग्नेयः । वै । ब्राह्मणः । स्वाम् । एव ।
देवताम् । अनु । समिति । तनोति । पुनरुथ्सृष्ट इति पुनः–उथ्सृष्टः ।
भवति । पुनरुथ्सृष्ट इति पुनः – उथ्सृष्टः । इव । हि ।
एतस्य । **34 (50)**

**TS 2.1.5.7**

सोमपीथः समृद्ध्यै ब्राह्मणस्पत्यं तूपरमा लभेता–भिचरन्
ब्रह्मणस्पतिमेव स्वेन भागधेयेनोप धावति तस्मा एवैनमा वृश्चति
ताजगार्ति–मार्च्छति तूपरो भवति क्षुरपविर्वा एषा लक्ष्मी यत् तूपरः
समृद्ध्यै स्फ्यो यूपो भवति वज्रो वै स्फ्यो वज्रमेवास्मै प्र हरति
शरमयं बर्.हिः शृणात्येवैनं वैँभीदक इद्ध्मो ( ) भिनत्त्येवैनं ॥ **35**

**TS 2.1.5.7 (Padam)**

सोमपीथ इति सोम – पीथः । समृद्ध्या इति सं – ऋद्ध्यै ।
ब्राह्मणस्पत्यमिति ब्राह्मणः – पत्यम् । तूपरम् । एति । लभेत ।
अभिचरन्नित्यभि – चरन्न् । ब्रह्मणः । पतिम् । एव । स्वेन ।

भागधेयेनेति भाग – धेयेन । उपेति । धावति । तस्मै ।
एव । एनम् । एति । वृश्चति । ताजक् । आर्तिम् । एति । ऋच्छति ।
तूपरः । भवति । क्षुरपविरिति क्षुर – पविः । वै ।
एषा । लक्ष्मी । यत् । तूपरः । समृद्ध्या इति सं – ऋद्ध्यै ।
स्फ्यः । यूपः । भवति । वज्रः । वै । स्फ्यः । वज्रम् । एव ।
अस्मै । प्रेति । हरति । शरमयमिति शर – मयम् । बर्.हिः ।
शृणाति । एव । एनम् । वैभीदकः । इद्ध्मः ( ) । भिनत्ति ।
एव । एनम् ॥ **35 (53)**

***(भवत्युन्नतः – पशवो – जनयन्ति विन्दते – ऽभवथ् – सन्नै – तस्ये – ध्म – स्त्रीणि च) (A5)***

**TS 2.1.6.1**

बार्.हस्पत्यꣳ शितिपृष्ठमा लभेत ग्रामकामो यः कामयेत पृष्ठꣳ समानानाꣳ स्यामिति बृहस्पतिमेव स्वेन भागधेयेनोप धावति स एवैनं पृष्ठꣳ समानानां करोति ग्राम्येव भवति शितिपृष्ठो भवति बार्.हस्पत्यो

ह्येष देवतया समृद्ध्यै पौष्ण७ श्याममा लभेतान्नकामो ऽन्नं ँवै पूषा पूषणमेव स्वेन भागधेयेनोप धावति स एवास्मा – [ ] 36

**TS 2.1.6.1 (Padam)**

बार्.हस्पत्यम् । शितिपृष्ठमिति शिति – पृष्ठम् । एति ।
लभेत । ग्रामकाम इति ग्राम – कामः । यः । कामयेत ।
पृष्ठम् । समानानाम् । स्याम् । इति । बृहस्पतिम् । एव ।
स्वेन । भागधेयेनेति भाग – धेयेन । उपेति । धावति ।
सः । एव । एनम् । पृष्ठम् । समानानाम् । करोति । ग्रामी ।
एव । भवति । शितिपृष्ठ इति शिति – पृष्ठः । भवति ।
बार्.हस्पत्यः । हि । एषः । देवतया । समृद्ध्या इति सं – ऋद्ध्यै ।
पौष्णम् । श्यामम् । एति । लभेत । अन्नकाम इत्यन्न – कामः ।
अन्नम् । वै । पूषा । पूषणम् । एव । स्वेन । भागधेयेनेति
भाग – धेयेन । उपेति । धावति । सः । एव । अस्मै । 36 (50)

**TS 2.1.6.2**

अन्नं प्र यच्छत्यन्नाद एव भवति श्यामो भवत्येतद् वा अन्नस्य रूप७ समृद्ध्यै मारुतं पृश्ञिमा लभेतान्नकामो ऽन्नं ँवै मरुतोमरुत एव

स्वेन भागधेयेनोप धावति त एवास्मा अन्नं प्र यच्छन्त्यन्नादएव

भवति पृश्ञि र्भवत्येतद् वा अन्नस्य रूपꣳ समृद्ध्या ऐन्द्रमरुणमा

लभेतेन्द्रियकाम इन्द्रमेव – [ ] 37

**TS 2.1.6.2 (Padam)**

अन्नम् । प्रेति । यच्छति । अन्नाद इत्यन्न – अदः । एव । भवति ।

श्यामः । भवति । एतत् । वै । अन्नस्य । रूपम् ।

समृद्ध्या इति सं – ऋद्ध्यै । मारुतम् । पृश्ञिम् । एति । लभेत ।

अन्नकाम इत्यन्न – कामः । अन्नम् । वै । मरुतः । मरुतः । एव ।

स्वेन । भागधेयेनेति भाग – धेयेन । उपेति । धावति । ते । एव ।

अस्मै । अन्नम् । प्रेति । यच्छन्ति । अन्नाद इत्यन्न – अदः । एव ।

भवति । पृश्ञिः । भवति । एतत् । वै । अन्नस्य । रूपम् ।

समृद्ध्या इति सं – ऋद्ध्यै । ऐन्द्रम् । अरुणम् । एति ।

लभेत । इन्द्रियकाम इतीन्द्रिय – कामः । इन्द्रम् । एव । 37 (50)

**TS 2.1.6.3**

स्वेन भागधेयेनोप धावति स एवास्मिन्निन्द्रियं दधातीन्द्रियाव्येव

भवत्यरुणो भ्रूमान् भवत्येतद् वा इन्द्रस्य रूपꣳ समृद्ध्यै

सावित्रमुपद्ध्वस्तमा लभेत सनिकामः सविता वै प्रसवानामीशे

सवितारमेव स्वेन भागधेयेनोप धावति स एवास्मै सनिं प्र सुवति

दानकामा अस्मै प्रजा भवन्त्युपद्ध्वस्तो भवति सावित्रो ह्येष–[ ] **38**

**<u>TS 2.1.6.3 (Padam)</u>**

स्वेन । भागधेयेनेति भाग – धेयेन । उपेति । धावति । सः ।

एव । अस्मिन्न् । इन्द्रियम् । दधाति । इन्द्रियावी । एव । भवति ।

अरुणः । भ्रूमानिति भ्रू – मान् । भवति । ऐतत् । वै । इन्द्रस्य ।

रूपम् । समृद्ध्या इति सं – ऋद्ध्यै । सावित्रम् ।

उपद्ध्वस्तमित्युप – ध्वस्तम् । एति । लभेत । सनिकाम इति

सनि – कामः । सविता । वै । प्रसवानामिति प्र–सवानाम् । ईशे ।

सवितारम् । एव । स्वेन । भागधेयेनेति भाग – धेयेन । उपेति ।

धावति । सः । एव । अस्मै । सनिम् । प्रेति । सुवति । दानकामा

इति दान–कामाः । अस्मै । प्रजा इति प्र–जाः । भवन्ति ।

उपद्ध्वस्त इत्युप – ध्वस्तः । भवति । सावित्रः ।

हि । एषः । **38 (50)**

**TS 2.1.6.4**

देवतया समृद्ध्यै वैश्वदेवं बहुरूपमा लभेतान्नकामोवैश्वदेवं ँवा अन्नं ँविश्वानेव देवान्थ् स्वेन भागधेयेनोप धावतित एवास्मा अन्नं प्र यच्छन्त्यन्नाद एव भवति बहुरूपो भवतिबहुरूप७ ह्यन्न७ं समृद्ध्यै वैश्वदेवं बहुरूपमा लभेत ग्रामकामो वैश्वदेवा वै सजाता विश्वानेव देवान्थ् स्वेन भागधेयेनोप धावति त एवास्मै - [ ] **39**

**TS 2.1.6.4 (Padam)**

देवतया । समृद्ध्या इति सं - ऋद्ध्यै । वैश्वदेवमिति वैश्व-देवम् । बहुरूपमिति बहु - रूपम् । एति । लभेत । अन्नकाम इत्यन्न - कामः । वैश्वदेवमिति वैश्व - देवम् । वै । अन्नम् । विश्वान् । एव । देवान् । स्वेन । भागधेयेनेति भाग-धेयेन । उपेति । धावति । ते । एव । अस्मै । अन्नम् । प्रेति । यच्छन्ति । अन्नाद इत्यन्न - अदः । एव । भवति । बहुरूप इति बहु-रूपः । भवति । बहुरूपमिति बहु - रूपम् । हि । अन्नम् । समृद्ध्या इति सं - ऋद्ध्यै । वैश्वदेवमिति वैश्व - देवम् । बहुरूपमिति बहु - रूपम् । एति । लभेत । ग्रामकाम इति ग्राम - कामः ।

वैश्वदेवा इति वैश्व – देवाः । वै । सजाता इति स – जाताः ।

विश्वान् । एव । देवान् । स्वेन । भागधेयेनेति भाग–धेयेन । उपेति ।

धावति । ते । एव । अस्मै । **39 (50)**

**TS 2.1.6.5**

सजातान् प्र यच्छन्ति ग्राम्येव भवति बहुरूपो भवति

बहुदेवत्यो(ओ1)ह्येष समृद्ध्यै प्राजापत्यं तूपरमा लभेत

यस्यानाज्ञातमिव ज्योगामयेत् प्राजापत्यो वै पुरुषः प्रजापतिः खलु

वै तस्य वेद यस्यानाज्ञातमिव ज्योगामयति प्रजापतिमेव स्वेन

भागधेयेनोप धावति स एवैनं तस्माथ् स्रामान्–मुञ्चति तूपरो भवति

प्राजापत्यो ह्ये ( )–ष देवतया समृद्ध्यै ॥ **40**

**TS 2.1.6.5 (Padam)**

सजातानिति स–जातान् । प्रेति । यच्छन्ति । ग्रामी । एव । भवति ।

बहुरूप इति बहु – रूपः । भवति । बहुदेवत्य इति बहु–देवत्यः ।

हि । एषः । समृद्ध्या इति सं – ऋद्ध्यै । प्रजापत्यमिति

प्राजा – पत्यम् । तूपरम् । एति । लभेत । यस्य ।

अनाज्ञातमित्यना – ज्ञातम् । इव । ज्योक् । आमयेत् ।

प्राजापत्य इति प्राजा – पत्यः । वै । पुरुषः ।

प्रजापतिरिति प्रजा – पतिः । खलु । वै । तस्य । वेद । यस्य ।

अनाज्ञातमित्यना – ज्ञातम् । इव । ज्योक् । आमयति ।

प्रजापतिमिति प्रजा – पतिम् । एव । स्वेन । भागधेयेनेति

भाग – धेयेन । उपेति । धावति । सः । एव । एनम् । तस्मात् ।

स्रामात् । मुञ्चति । तूपरः । भवति । प्राजापत्य इति प्राजा–पत्यः ।

हि ( ) । एषः । देवतया । समृद्ध्या इति सं – ऋद्ध्यै ॥ **40 (53)**

*(अस्मा – इन्द्रमेवै – ष – सजाता विश्वानेव देवान्थ् स्वेन भाग धेयेनोप धावति त एवास्मै – प्राजापत्यो हि – त्रीणि च)(A6)*

**TS 2.1.7.1**

वषट्कारो वै गायत्रियै शिरो ऽच्छिनत् तस्यै रसः परापतत् तं बृहस्पतिरुपा ऽगृह्णाथ्सा शितिपृष्ठा वशा ऽभवद् यो द्वितीयः परा ऽपतत् तं मित्रावरुणा–वुपागृह्णीता॑ सा द्विरूपा वशा ऽभवद्–यस्तृतीयः परापतत् तं॑ विश्वे देवा उपागृह्णन्थ् सा बहुरूपा वशा ऽभवद्य–श्चतुर्थः परापतथ् स पृथिवीं प्राविशत् तं बृहस्पतिरभ्य–[ ]

41

**TS 2.1.7.1 (Padam)**

वषट्कार इति वषट् – कारः । वै । गायत्रियै । शिरः । अच्छिनत् ।
तस्यै । रसः । परेति । अपतत् । तम् । बृहस्पतिः । उपेति ।
अगृह्णात् । सा । शितिपृष्ठेति शिति – पृष्ठा । वशा । अभवत् ।
यः । द्वितीयः । परापतदिति परा – अपतत् । तम् ।
मित्रावरुणाविति मित्रा – वरुणौ । उपेति । अगृह्णीताम् । सा ।
द्विरूपेति द्वि – रूपा । वशा । अभवत् । यः । तृतीयः ।
परापतदिति परा – अपतत् । तम् । विश्वे । देवाः । उपेति ।
अगृह्णन् । सा । बहुरूपेति बहु – रूपा । वशा । अभवत् । यः ।
चतुर्थः । परापतदिति परा – अपतत् । सः । पृथिवीम् । प्रेति ।
अविशत् । तम् । बृहस्पतिः । अभीति । **41 (50)**

**TS 2.1.7.2**

–गृह्णादस्त्वेवायं भोगायेति स उक्षवशः समभवद्–यल्लोहितं
परापतत् तद्–रुद्र उपागृह्णाथ् सा रौद्री रोहिणी वशा ऽभवद्–
बार्.हस्पत्या॒ शितिपृष्ठामा लभेत ब्रह्मवर्चसकामो बृहस्पतिमेव
स्वेन भागधेयेनोप धावति स एवास्मिन् ब्रह्मवर्चसं दधाति

ब्रह्मवर्चस्येव भवति छन्दसां ँवा एष रसो यद् वशा रस

इव खलु– [ ] 42

**TS 2.1.7.2 (Padam)**

अगृह्णात् । अस्तु । एव । अयम् । भोगाय । इति । सः ।

उक्षवश इत्युक्ष – वशः । समिति । अभवत् । यत् । लोहितम् ।

परापतदिति परा – अपतत् । तत् । रुद्रः । उपेति । अगृह्णात् ।

सा । रौद्री । रोहिणी । वशा । अभवत् । बार्.हस्पत्याम् ।

शितिपृष्ठामिति शिति – पृष्ठाम् । एति । लभेत ।

ब्रह्मवर्चसकाम इति ब्रह्मवर्चस – कामः । बृहस्पतिम् ।

एव । स्वेन । भागधेयेनेति भाग – धेयेन । उपेति । धावति ।

सः । एव । अस्मिन्न् । ब्रह्मवर्चसमिति ब्रह्म – वर्चसम् ।

दधाति । ब्रह्मवर्चसीति ब्रह्म – वर्चसी । एव । भवति । छन्दसाम् ।

वै । एषः । रसः । यत् । वशा । रसः । इव । खलु । 42 (50)

**TS 2.1.7.3**

वै ब्रह्मवर्चसं छन्दसामेव रसेन रसं ब्रह्मवर्चसमव रुन्धे मैत्रावरुणीं

द्विरूपामा लभेत वृष्टिकामो मैत्रं ँवा अहर्वारुणी रात्रिरहोरात्राभ्यां

खलु वै पर्जन्यो वर्.षति मित्रावरुणावेव स्वेन भागधेयेनोप धावति
तावेवास्मा अहोरात्राभ्यां पर्जन्यं ँवर्.षयतः छन्दसां ँवा एष रसो
यद् वशा रस इव खलु वै वृष्टिः छन्दसामेव रसेन – [ ] **43**

**TS 2.1.7.3 (Padam)**

वै । ब्रह्मवर्चसमिति ब्रह्म – वर्चसम् । छन्दसाम् । एव । रसेन ।
रसम् । ब्रह्मवर्चसमिति ब्रह्म – वर्चसम् । अवेति । रुन्धे ।
मैत्रावरुणीमिति मैत्रा – वरुणीम् । द्विरूपामिति द्वि – रूपाम् ।
एति । लभेत । वृष्टिकाम इति वृष्टि – कामः । मैत्रम् । वै ।
अहः । वारुणी । रात्रिः । अहोरात्राभ्यामित्यहः – रात्राभ्याम् ।
खलु । वै । पर्जन्यः । वर्.षति । मित्रावरुणाविति मित्रा – वरुणौ ।
एव । स्वेन । भागधेयेनेति भाग – धेयेन । उपेति । धावति । तौ ।
एव । अस्मै । अहोरात्राभ्यामित्यहः – रात्राभ्याम् । पर्जन्यम् ।
वर्.षयतः । छन्दसाम् । वै । एषः । रसः । यत् । वशा ।
रसः । इव । खलु । वै । वृष्टिः । छन्दसाम् । एव । रसेन । **43 (50)**

**TS 2.1.7.4**

रसं ँवृष्टिमव रुन्धे मैत्रावरुणीं द्विरूपामा लभेत प्रजाकामो

मैत्रं ँवा अहर्वारुणी रात्रिरहोरात्राभ्यां खलु वै प्रजाः प्र जायन्ते

मित्रावरुणावेव स्वेन भागधेयेनोप धावति तावेवास्मा अहोरात्राभ्यां

प्रजां प्र जनयतः छन्दसां ँवा एष रसो यद् वशा रस इव खलु वै

प्रजा छन्दसामेव रसेन रसं प्रजामव – [ ] **44**

**TS 2.1.7.4 (Padam)**

रसम् । वृष्टिम् । अवेति । रुन्धे । मैत्रावरुणीमिति मैत्रा – वरुणीम् ।

द्विरूपामिति द्वि – रूपाम् । एति । लभेत । प्रजाकाम इति

प्रजा – कामः । मैत्रम् । वै । अहः । वारुणी । रात्रिः ।

अहोरात्राभ्यामित्यहः – रात्राभ्याम् । खलु । वै । प्रजा इति

प्र – जाः । प्रेति । जायन्ते । मित्रावरुणाविति मित्रा–वरुणौ । एव ।

स्वेन । भागधेयेनेति भाग – धेयेन । उपेति । धावति । तौ । एव ।

अस्मै । अहोरात्राभ्यामित्यहः – रात्राभ्याम् । प्रजामिति प्र –जाम् ।

प्रेति । जनयतः । छन्दसाम् । वै । एषः । रसः । यत् । वशा ।

रसः । इव । खलु । वै । प्रजेति प्र–जा । छन्दसाम् । एव । रसेन ।
रसम् । प्रजामिति प्र –जाम् । अवेति । **44 (50)**

**TS 2.1.7.5**

रुन्धे वैश्वदेवीं बहुरूपामा लभेतान्नकामो वैश्वदेवं ँवा अन्नं
ँविश्वानेव देवान्थ् स्वेन भागधेयेनोप धावति त एवास्मा अन्नं
प्र यच्छन्त्यन्नाद एव भवति छन्दसां ँवा एष रसो यद् वशा रस इव
खलु वा अन्नं छन्दसामेव रसेन रसमन्नमव रुन्धे वैश्वदेवीं
बहुरूपामा लभेत ग्रामकामो वैश्वदेवा वै – [ ] **45**

**TS 2.1.7.5 (Padam)**

रुन्धे । वैश्वदेवीमिति वैश्व – देवीम् । बहुरूपामिति बहु – रूपाम् ।
एति । लभेत । अन्नकाम इत्यन्न – कामः । वैश्वदेवमिति
वैश्व – देवम् । वै । अन्नम् । विश्वान् । एव । देवान् । स्वेन ।
भागधेयेनेति भाग – धेयेन । उपेति । धावति । ते । एव । अस्मै ।
अन्नम् । प्रेति । यच्छन्ति । अन्नाद इत्यन्न – अदः । एव । भवति ।
छन्दसाम् । वै । एषः । रसः । यत् । वशा । रसः । इव । खलु ।
वै । अन्नम् । छन्दसाम् । एव । रसेन । रसम् । अन्नम् । अवेति ।

रुन्धे । वैश्वदेवीमिति वैश्व - देवीम् । बहुरूपामिति बहु-रूपाम् ।
एति । लभेत । ग्रामकाम इति ग्राम - कामः ।
वैश्वदेवा इति वैश्व - देवाः । वै । **45 (50)**

**TS 2.1.7.6**

सजाता विश्वानेव देवान्थ् स्वेन भागधेयेनोप धावति त एवास्मै
सजातान् प्र यच्छन्ति ग्राम्येव भवति छन्दसाँ वा एष रसो यद् वशा
रस इव खलु वै सजाता श्छन्दसामेव रसेन रस९ं सजातानव रुन्धे
बार्.हस्पत्य- मुक्षवशमा लभेत ब्रह्मवर्चसकामो बृहस्पतिमेव स्वेन
भागधेयेनोप धावति स एवास्मिन् ब्रह्मवर्चसं - [ ] **46**

**TS 2.1.7.6 (Padam)**

सजाता इति स - जाताः । विश्वान् । एव । देवान् । स्वेन ।
भागधेयेनेति भाग - धेयेन । उपेति । धावति । ते । एव । अस्मै ।
सजातानिति स-जातान् । प्रेति । यच्छन्ति । ग्रामी । एव । भवति ।
छन्दसाम् । वै । एषः । रसः । यत् । वशा । रसः । इव । खलु ।
वै । सजाता इति स - जाताः । छन्दसाम् । एव । रसेन । रसम् ।
सजातानिति स - जातान् । अवेति । रुन्धे । बार्.हस्पत्यम् ।

उक्षवशमित्युक्ष – वशम् । एति । लभेत ।
ब्रह्मवर्चसकाम इति ब्रह्मवर्चस – कामः । बृहस्पतिम् । एव ।
स्वेन । भागधेयेनेति भाग – धेयेन । उपेति । धावति । सः । एव ।
अस्मिन्न् । ब्रह्मवर्चसमिति ब्रह्म – वर्चसम् । **46 (50)**

**TS 2.1.7.7**

दधाति ब्रह्मवर्चस्येव भवति वशं ँवा एष चरति यदुक्षावश इव खलु वै ब्रह्मवर्चसं ँवशेनैव वशं ब्रह्मवर्चसमव रुन्धेरौद्रीꣳरोहिणीमा लभेताभिचरन् रुद्रमेव स्वेन भागधेयेनोप धावति तस्मा एवैनमा वृश्चति ताजगार्तिमार्च्छति रोहिणी भवति रौद्री ह्येषा देवतया समृद्ध्यै स्फ्यो यूपो ( ) भवति वज्रो वै स्फ्यो वज्रमेवास्मै प्र हरति शरमयं बर्.हिः शृणात्येवैनं वैभीदक इद्ध्मो भिनत्त्येवैनं ॥ **47**

**TS 2.1.7.7 (Padam)**

दधाति । ब्रह्मवर्चसीति ब्रह्म – वर्चसी । एव । भवति ।
वशम् । वै । एषः । चरति । यत् । उक्षा । वशः । इव । खलु । वै ।
ब्रह्मवर्चसमिति ब्रह्म – वर्चसम् । वशेन । एव । वशम् ।
ब्रह्मवर्चसमिति ब्रह्म – वर्चसम् । अवेति । रुन्धे । रौद्रीम् ।

रोहिणीम् । एति । लभेत । अभिचरन्नित्यभि–चरन्न् । रुद्रम् । एव ।

स्वेन । भागधेयेनेति भाग – धेयेन । उपेति । धावति । तस्मै । एव ।

एनम् । एति । वृश्चति । ताजक् । आर्तिम् । एति । ऋच्छति ।

रोहिणी । भवति । रौद्री । हि । एषा । देवतया । समृद्ध्या इति

सं – ऋद्ध्यै । स्फ्यः । यूपः ( ) । भवति । वज्रः । वै । स्फ्यः ।

वज्रम् । एव । अस्मै । प्रेति । हरति । शरमयमिति शर – मयम् ।

बर्.हिः । शृणाति । एव । एनम् । वैभीदकः । इद्ध्मः । भिनत्ति ।

एव । एनम् ॥ **47 (69)**

***(अभि – खलु – वृष्टि श्छन्दसामेव रसेन – प्रजामव – वैश्वदेवा वै – ब्रह्मवर्चसं – यूँप – एकान्नविꣳशतिश्च) (A7)***

**TS 2.1.8.1**

असावादित्यो न व्यरोचत तस्मै देवाः प्रायश्चित्तिमैच्छन् तस्मा एताꣳ सौरीꣳ श्वेतां वँशामा ऽलभन्त तयैवास्मिन् रुचमदधुर्यो ब्रह्मवर्चसकामः स्यात् तस्मा एताꣳ सौरीꣳ श्वेतां वँशामा लभेतामुमेवाऽऽदित्यꣳ स्वेन भागधेयेनोप धावति स एवास्मिन्

ब्रह्मवर्चसं दधाति ब्रह्मवर्चस्येव भवति बैल्.वो यूपो

भवत्यसौ–[ ] **48**

**TS 2.1.8.1 (Padam)**

असौ । आदित्यः । न । वीति । अरोचत । तस्मै । देवाः ।

प्रायश्चित्तिम् । ऐच्छन्न् । तस्मै । एताम् । सौरीम् । श्वेताम् ।

वशाम् । एति । अलभन्त । तया । एव । अस्मिन्न् । रुचम् ।

अदधुः । यः । ब्रह्मवर्चसकाम इति ब्रह्मवर्चस – कामः ।

स्यात् । तस्मै । एताम् । सौरीम् । श्वेताम् । वशाम् । एति । लभेत ।

अमुम् । एव । आदित्यम् । स्वेन । भागधेयेनेति भाग – धेयेन ।

उपेति । धावति । सः । एव । अस्मिन्न् । ब्रह्मवर्चसमिति

ब्रह्म – वर्चसम् । दधाति । ब्रह्मवर्चसीति ब्रह्म – वर्चसी । एव ।

भवति । बैल्.वः । यूपः । भवति । असौ । **48 (50)**

**TS 2.1.8.2**

वा आदित्यो यतो ऽजायत ततो बिल्व उदतिष्ठथ् सयोन्येव ब्रह्मवर्चसमव

रुन्धे ब्राह्मणस्पत्यां बभ्रुकर्णीमा लभेताभिचरन् वारुणं दशकपालं

पुरस्तान् निर्वपेद् वरुणेनैव भ्रातृव्यं ग्राहयित्वा ब्रह्मणा स्तृणुते

बभ्रुकर्णी भवत्येतद्–वै ब्रह्मणो रूप९ं समृद्ध्यै स्फ्यो यूपो भवति

वज्रो वै स्फ्यो वज्रमेवास्मै प्र हरति शरमयं बर्.हिः शृणा – [ ] **49**

**TS 2.1.8.2 (Padam)**

वै । आदित्यः । यतः । अजायत । ततः । बिल्वः । उदिति ।

अतिष्ठत् । सयोनीति स – योनि । एव ।

ब्रह्मवर्चसमिति ब्रह्म – वर्चसम् । अवेति । रुन्धे ।

ब्राह्मणस्पत्यामिति ब्राह्मणः – पत्याम् । बभ्रुकर्णीमिति

बभ्रु – कर्णीम् । एति । लभेत । अभिचरन्नित्यभि – चरन्न् ।

वारुणम् । दशकपालमिति दश – कपालम् । पुरस्तात् । निरिति ।

वपेत् । वरुणेन । एव । भ्रातृव्यम् । ग्राहयित्वा । ब्रह्मणा ।

स्तृणुते । बभ्रुकर्णीति बभ्रु – कर्णी । भवति । एतत् ।

वै । ब्रह्मणः । रूपम् । समृद्ध्या इति सं–ऋद्ध्यै । स्फ्यः । यूपः ।

भवति । वज्रः । वै । स्फ्यः । वज्रम् । एव । अस्मै । प्रेति । हरति ।

शरमयमिति शर – मयम् । बर्.हिः । शृणाति । **49 (50)**

**TS 2.1.8.3**

–त्येवैनं ँवैभीदक इद्ध्मो भिनत्त्येवैनं ँवैष्णवं ँवामनमा लभेत

यं ँयज्ञो नोपनमेद्–विष्णुर्वै यज्ञो विष्णुमेव स्वेन भागधेयेनोप

धावति स एवास्मै यज्ञं प्र यच्छत्युपैनं ँयज्ञो नमति वामनो भवति

वैष्णवो ह्येष देवतया समृद्ध्यै त्वाष्ट्रं ँवडबमा लभेत पशुकामस्त्वष्टा

वै पशूनां मिथुनानां – [ ] **50**

**TS 2.1.8.3 (Padam)**

एव । एनम् । वैभीदकः । इद्ध्मः । भिनत्ति । एव । एनम् ।

वैष्णवम् । वामनम् । एति । लभेत । यम् । यज्ञः । न ।

उपनमेदित्युप–नमेत् । विष्णुः । वै । यज्ञः । विष्णुम् । एव । स्वेन ।

भागधेयेनेति भाग – धेयेन । उपेति । धावति । सः । एव ।

अस्मै । यज्ञम् । प्रेति । यच्छति । उपेति । एनम् । यज्ञः ।

नमति । वामनः । भवति । वैष्णवः । हि । एषः । देवतया ।

समृद्ध्या इति सं – ऋद्ध्यै । त्वाष्ट्रम् । वडबम् । एति ।

लभेत । पशुकाम इति पशु – कामः । त्वष्टा । वै ।

पशूनाम् । मिथुनानाम् । **50 (50)**

**TS 2.1.8.4**

प्रजनयिता त्वष्टारमेव स्वेन भागधेयेनोप धावति स एवास्मै पशून् मिथुनान् प्र जनयति प्रजा हि वा एतस्मिन् पशवः प्रविष्टा अथैष पुमान्थ्सन् वडबः साक्षादेव प्रजां पशूनव रुन्धे मैत्र७ श्वेतमा लभेत संग्रामे सँयत्ते समयकामो मित्रमेव स्वेन भागधेयेनोप धावति स एवैनं मित्रेण सं नयति – [ ] **51**

**TS 2.1.8.4 (Padam)**

प्रजनयितेति प्र – जनयिता । त्वष्टारम् । एव । स्वेन । भागधेयेनेति भाग – धेयेन । उपेति । धावति । सः । एव । अस्मै । पशून् । मिथुनान् । प्रेति । जनयति । प्रजेति प्र – जा । हि । वै । एतस्मिन्न् । पशवः । प्रविष्टा इति प्र – विष्टाः । अथ । एषः । पुमान् । सन्न् । वडबः । साक्षादिति स – अक्षात् । एव । प्रजामिति प्र –जाम् । पशून् । अवेति । रुन्धे । मैत्रम् । श्वेतम् । एति । लभेत । सङ्ग्राम इति सं – ग्रामे । सँयत्त इति सं – यत्ते । समयकाम इति समय – कामः । मित्रम् । एव । स्वेन ।

भागधेयेनेति भाग – धेयेन । उपेति । धावति । सः । एव ।

एनम् । मित्रेण । समिति । नयति । **51 (50)**

**TS 2.1.8.5**

विशालो भवति व्यवसाययत्येवैनं प्राजापत्यं कृष्णमा लभेत

वृष्टिकामः प्रजापतिर्वै वृष्ट्या ईशे प्रजापतिमेव स्वेन भागधेयेनोप

धावति स एवास्मै पर्जन्यं ँवर्.षयति कृष्णो भवत्येतद् वै वृष्ट्यै

रूप*ं रूपेणैव वृष्टिमव रुन्धे शबलो भवति विद्युतमेवास्मै जनयित्वा

वर्.षयत्यवाशृङ्गो भवति वृष्टिमेवास्मै नि यच्छति ( ) ॥ **52**

**TS 2.1.8.5 (Padam)**

विशाल इति वि – शालः । भवति । व्यवसाययतीति

वि – अवसाययति । एव । एनम् । प्राजापत्यमिति प्राजा – पत्यम् ।

कृष्णम् । एति । लभेत । वृष्टिकाम इति वृष्टि – कामः ।

प्रजापतिरिति प्रजा – पतिः । वै । वृष्ट्याः । ईशे । प्रजापतिमिति

प्रजा – पतिम् । एव । स्वेन । भागधेयेनेति भाग–धेयेन । उपेति ।

धावति । सः । एव । अस्मै । पर्जन्यम् । वर्.षयति । कृष्णः ।

भवति । एतत् । वै । वृष्ट्यै । रूपम् । रूपेण । एव । वृष्टिम् ।

अवेति । रुन्धे । शबलः । भवति । विद्युतमिति वि – द्युतम् । एव ।
अस्मै । जनयित्वा । वर्.षयति । अवाशृङ्गः । भवति । वृष्टिम् ।
एव । अस्मै । नीति । यच्छति ( ) ॥ **52 (50)**

*(असौ – शृणाति – मिथुनानां – नयति – यच्छति) (A8)*

**TS 2.1.9.1**

वरुण७ं सुषुवाणमन्नाद्यं नोपानमथ् स एतां ँवारुणीं कृष्णां ँवशामपश्यत् ता७ं स्वायै देवताया आ ऽलभत ततो वै तमन्नाद्य–मुपानमद्–यमलमन्नाद्याय सन्तमन्नाद्यं नोपनमेथ् स एतां ँवारुणीं कृष्णां ँवशामा लभेत वरुणमेव स्वेन भागधेयेनोप धावति स एवास्मा अन्नं प्र यच्छत्यन्नाद – [ ] **53**

**TS 2.1.9.1 (Padam)**

वरुणम् । सुषुवाणम् । अन्नाद्यमित्यन्न – अद्यम् । न । उपेति ।
अनमत् । सः । एताम् । वारुणीम् । कृष्णाम् । वशाम् । अपश्यत् ।
ताम् । स्वायै । देवतायै । एति । अलभत । ततः । वै । तम् ।
अन्नाद्यमित्यन्न – अद्यम् । उपेति । अनमत् । यम् । अलम् ।
अन्नाद्यायेत्यन्न – अद्याय । सन्तम् । अन्नाद्यमित्यन्न – अद्यम् । न ।

उपनमेदित्युप–नमेत् । सः । एताम् । वारुणीम् । कृष्णाम् । वशाम् । एति । लभेत । वरुणम् । एव । स्वेन । भागधेयेनेति भाग – धेयेन । उपेति । धावति । सः । एव । अस्मै । अन्नम् । प्रेति । यच्छति । अन्नाद इत्यन्न – अदः । **53 (50)**

**TS 2.1.9.2**

एव भवति कृष्णा भवति वारुणी ह्येषा देवतया समृद्ध्यै मैत्र७ श्वेतमा लभेत वारुणं कृष्णमपां चौषधीनां च सन्धावन्नकामो मैत्रीर्वा ओषधयो वारुणीरापो ऽपां च खलु वा ओषधीनां च रसमुप जीवामो मित्रावरुणावेव स्वेन भागधेयेनोप धावति तावेवास्मा अन्नं प्र यच्छतो ऽन्नाद एव भव – [ ] **54**

**TS 2.1.9.2 (Padam)**

एव । भवति । कृष्णा । भवति । वारुणी । हि । एषा । देवतया । समृद्ध्या इति सं – ऋद्ध्यै । मैत्रम् । श्वेतम् । एति । लभेत । वारुणम् । कृष्णम् । अपाम् । च । ओषधीनाम् । च । सन्धाविति सं – धौ । अन्नकाम इत्यन्न – कामः । मैत्रीः । वै । ओषधयः । वारुणीः । आपः । अपाम् । च । खलु । वै । ओषधीनाम् । च ।

रसम् । उपेति । जीवामः । मित्रावरुणाविति मित्रा – वरुणौ । एव ।

स्वेन । भागधेयेनेति भाग – धेयेन । उपेति । धावति । तौ । एव ।

अस्मै । अन्नम् । प्रेति । यच्छतः । अन्नाद इत्यन्न – अदः । एव ।

भवति । **54 (50)**

**TS 2.1.9.3**

–त्यपां चौषधीनां च सन्धावा लभत उभयस्यावरुद्ध्यै विशाखो

यूपो भवति द्वे ह्येते देवते समृद्ध्यै मैत्र७ श्वेतमा लभेत वारुणं

कृष्णं ज्योगामयावी यन् मैत्रो भवति मित्रेणैवास्मै वरुण७ं शमयति

यद्–वारुणः साक्षादेवैनं ँवरुणपाशान् मुञ्चत्युत यदीतासुर्भवति

जीवत्येव देवा वै पुष्टिं नाविन्दन् – [ ] **55**

**TS 2.1.9.3 (Padam)**

अपाम् । च । ओषधीनाम् । च । सन्धाविति सं–धौ । एति । लभते ।

उभयस्य । अवरुद्ध्या इत्यव – रुध्यै । विशाख इति वि–शाखः ।

यूपः । भवति । द्वे इति । हि । एते इति । देवते इति ।

समृद्ध्या इति सं – ऋद्ध्यै । मैत्रम् । श्वेतम् । एति । लभेत ।

वारुणम् । कृष्णम् । ज्योगामयावीति ज्योक् – आमयावी ।

यत् । मैत्रः । भवति । मित्रेण । एव । अस्मै । वरुणम् । शमयति ।
यत् । वारुणः । साक्षादिति स – अक्षात् । एव । एनम् ।
वरुणपाशादिति वरुण – पाशात् । मुञ्चति । उत । यदि ।
इतासुरितीत–असुः । भवति । जीवति । एव । देवाः । वै । पुष्टिम् ।
न । अविन्दन्न् । **55 (50)**

**TS 2.1.9.4**

तां मिथुने ऽपश्यन् तस्यां न समराधयन् तावश्विना–वब्रूतामावयोर्वा
एषा मैतस्यां वदद्ध्वमिति सा ऽश्विनोरेवाभवद्यः पुष्टिकामः स्याथ् स
एतामाश्विनीं यमीं वशामा लभेताश्विनावेव स्वेन भागधेयेनोप
धावति तावेवास्मिन् पुष्टिं धत्तः पुष्यति प्रजया पशुभिः ॥ **56**

**TS 2.1.9.4 (Padam)**

ताम् । मिथुने । अपश्यन्न् । तस्याम् । न । समिति । अराधयन्न् ।
तौ । अश्विनौ । अब्रूताम् । आवयोः । वै । एषा । मा । एतस्याम् ।
वदद्ध्वम् । इति । सा । अश्विनोः । एव । अभवत् । यः ।
पुष्टिकाम इति पुष्टि – कामः । स्यात् । सः । एताम् । आश्विनीम् ।
यमीम् । वशाम् । एति । लभेत । अश्विनौ । एव । स्वेन ।

भागधेयेनेति भाग – धेयेन । उपेति । धावति । तौ । एव ।

अस्मिन्न् । पुष्टिम् । धत्तः । पुष्यति । प्रजयेति प्र – जया ।

पशुभिरिति पशु – भिः ॥ **56 (45)** *(अन्नादो – ऽन्नाद एव भवत्य – विन्दन् – पञ्चचत्वारिꣳशच्च)* *(A9)*

**TS 2.1.10.1**

आश्विनं धूम्रललाममा लभेत यो दुर्ब्राह्मणः सोमं पिपासेदश्विनौ वै देवाना–मसोमपावास्तां तौ पश्चा सोमपीथं प्राप्नुता–मश्विनावेतस्य देवता यो दुर्ब्राह्मणः सोमं पिपासत्यश्विनावेव स्वेन भागधेयेनोप धावतितावेवास्मै सोमपीथं प्र यच्छत उपैनꣳ सोमपीथो नमति यद्– धूम्रो भवति धूम्रिमाण–मेवास्मादप हन्ति ललामो – [ ] **57**

**TS 2.1.10.1 (Padam)**

आश्विनम् । धूम्रललाममिति धूम्र – ललामम् । एति ।

लभेत । यः । दुर्ब्राह्मण इति दुः – ब्राह्मणः । सोमम् ।

पिपासेत् । अश्विनौ । वै । देवानाम् । असोमपावित्यसोम – पौ ।

आस्ताम् । तौ । पश्चा । सोमपीथमिति सोम – पीथम् । प्रेति ।

आप्नुताम् । अश्विनौ । एतस्य । देवता । यः ।

दुर्ब्राह्मण इति दुः- ब्राह्मणः । सोमम् । पिपासति । अश्विनौ ।

एव । स्वेन । भागधेयेनेति भाग - धेयेन । उपेति । धावति । तौ ।

एव । अस्मै । सोमपीथमिति सोम-पीथम् । प्रेति । यच्छतः ।

उपेति । एनम् । सोमपीथ इति सोम - पीथः । नमति । यत् ।

धूम्रः । भवति । धूम्रिमाणम् । एव । अस्मात् । अपेति । हन्ति ।

ललामः । **57 (50)**

**<u>TS 2.1.10.2</u>**

भवति मुखत एवास्मिन् तेजो दधाति वायव्यं गोमृगमा लभेत

यमजघ्निवा॰स-मभिश॰सेयु-रपूता वा एतं ँवागृच्छति

यमजघ्निवा॰स-मभिश॰सन्ति नैष ग्राम्यः पशुर्नारण्यो यद्-गोमृगो

नेवैष ग्रामे नारण्ये यमजघ्निवा॰स-मभिश॰सन्ति वायुर्वै देवानां

पवित्रं ँवायुमेव स्वेन भागधेयेनोप धावति स एवै - [ ] **58**

**<u>TS 2.1.10.2 (Padam)</u>**

भवति । मुखतः । एव । अस्मिन्न् । तेजः । दधाति । वायव्यम् ।

गोमृगमिति गो - मृगम् । एति । लभेत । यम् । अजघ्निवा॰सम् ।

अभिश॰सेयुरित्यभि - श॰सेयुः । अपूता । वै । एतम् । वाक् ।

ऋच्छति । यम् । अजघ्निवा॒ꣳसम् ।

अभिश॒ꣳसन्तीत्यभि – श॒ꣳसन्ति । न । एषः । ग्राम्यः ।

पशुः । न । आरण्यः । यत् । गोमृग इति गो – मृगः । न । इव ।

एषः । ग्रामे । न । अरण्ये । यम् । अजघ्निवा॒ꣳसम् ।

अभिश॒ꣳसन्तीत्यभि–श॒ꣳसन्ति । वायुः । वै । देवानाम् । पवित्रम् ।

वायुम् । एव । स्वेन । भागधेयेनेति भाग–धेयेन । उपेति । धावति ।

सः । एव । **58 (50)**

**<u>TS 2.1.10.3</u>**

–नं पवयति पराची वा एतस्मै व्युच्छन्ती व्युच्छति तमः पाप्मानं

प्र विशति यस्याश्विने शस्यमाने सूर्यो नाऽऽविर्भवति

सौर्यं बहुरूपमा लभेतामुमेवादित्यꣳ स्वेन भागधेयेनोप धावति

स एवास्मात् तमः पाप्मानमप हन्ति प्रतीच्यस्मै व्युच्छन्ती व्युच्छत्यप

तमः पाप्मान॒ꣳ हते ॥ **59**

**<u>TS 2.1.10.3 (Padam)</u>**

एनम् । पवयति । पराची । वै । एतस्मै । व्युच्छन्तीति

वि–उच्छन्ती । वीति । उच्छति । तमः । पाप्मानम् । प्रेति । विशति ।

यस्य । आश्विने । शस्यमाने । सूर्यः । न । आविः । भवति ।

सौर्यम् । बहुरूपमिति बहु – रूपम् । एति । लभेत । अमुम् । एव ।

आदित्यम् । स्वेन । भागधेयेनेति भाग – धेयेन । उपेति ।

धावति । सः । एव । अस्मात् । तमः । पाप्मानम् । अपेति ।

हन्ति । प्रतीची । अस्मै । व्युच्छन्तीति वि – उच्छन्ती । वीति ।

उच्छति । अपेति । तमः । पाप्मानम् । हते ॥ **59 (46)**

*(ललामः – स एव – षट्चत्वारिꣳशच्च) (A10)*

**TS 2.1.11.1**

इन्द्रं ँवो विश्वतस्परीन्द्रं नरो मरुतो यद्ध वो दिवो या वः शर्म ॥

भरेष्विन्द्रꣳ सुहवꣳ हवामहेऽꣳहोमुचꣳ सुकृतं दैव्यं जनं ।

अग्निं मित्रं ँवरुणꣳ सातये भगं द्यावापृथिवी मरुतः स्वस्तये ॥

ममत्तु नः परिज्मा वसर्.हा ममत्तु वातो अपां ँवृषण्वान् ।

शिशीतमिन्द्रापर्वता युवं नस्तन्नो विश्वे वरिवस्यन्तु देवाः ॥

प्रिया वो नाम – [ ] **60**

**TS 2.1.11.1 (Padam)**

इन्द्रम् । वः । विश्वतः । परीति । इन्द्रम् । नरः । मरुतः । यत् ।

ह । वः । दिवः । या । वः । शर्म ॥ भरेषु । इन्द्रम् ।

सुहवमिति सु – हवम् । हवामहे । अ॒ꣳहोमुचमित्य॒ꣳहः – मुचम् ।

सुकृतमिति सु – कृतम् । दैव्यम् । जनम् ॥ अग्निम् । मित्रम् ।

वरुणम् । सातये । भगम् । द्यावापृथिवी इति द्यावा – पृथिवी ।

मरुतः । स्वस्तये ॥ ममत्तु । नः । परिज्मेति परि–ज्मा । वसर्.हा ।

ममत्तु । वातः । अपाम् । वृषण्वानिति वृषण् – वान् ॥ शिशीतम् ।

इन्द्रापर्वतेतीन्द्रा – पर्वता । युवम् । नः । तत् । नः । विश्वे ।

वरिवस्यन्तु । देवाः ॥ प्रिया । वः । नाम । **60 (50)**

**TS 2.1.11.2**

हुवे तुराणां ।

आ यत् तृपन्मरुतो वावशानाः ॥

श्रियसे कं भानुभिः सं मिमिक्षिरे ते रश्मिभिस्त ऋक्वभिः सुखादयः ।

ते वाशीमन्त इष्मिणो अभीरवो विद्रे प्रियस्य मारुतस्य धाम्नः ॥

अग्निः प्रथमो वसुभिर्नो अव्याथ् सोमो रुद्रेभिरभि रक्षतु त्मना ।

इन्द्रो मरुद्भिर्. ऋतुधा कृणोत्वादित्यैर्नो वरुणः स_ं शिशातु ॥

सं नो देवो वसुभिरग्निः स_ं – [ ] **61**

**TS 2.1.11.2 (Padam)**

हुवे । तुराणाम् ॥ एति । यत् । तृपत् । मरुतः । वावशानाः ॥

श्रियसे । कम् । भानुभिरिति भानु–भिः । समिति । मिमिक्षिरे ।

ते । रश्मिभिरिति रश्मि – भिः । ते । ऋक्वभिरित्यृक्व – भिः ।

सुखादय इति सु – खादयः ॥ ते । वाशीमन्त इति

वाशि – मन्तः । इष्मिणः । अभीरवः । विद्रे । प्रियस्य ।

मारुतस्य । धाम्नः ॥ अग्निः । प्रथमः । वसुभिरिति वसु–भिः ।

नः । अव्यात् । सोमः । रुद्रेभिः । अभीति । रक्षतु । त्मना ॥

इन्द्रः । मरुद्भिरिति मरुत् – भिः । ऋतुधेत्यृतु – धा । कृणोतु ।

आदित्यैः । नः । वरुणः । समिति । शिशातु ॥ समिति । नः ।

देवः । वसुभिरिति वसु – भिः । अग्निः । समिति । **61 (50)**

**TS 2.1.11.3**

सोमस्तनूभी रुद्रियाभिः ।

समिन्द्रो मरुद्भिर्यज्ञियैः समादित्यैर्नो वरुणो अजिज्ञिपत् ॥

यथा ऽऽदित्या वसुभिः संबभूवुर्मरुद्भी रुद्राः समजानताभि ।

एवा त्रिणामन्नहृणीयमाना विश्वे देवाः समनसो भवन्तु ॥

कुत्रा चिद्यस्य समृतौ रण्वा नरो नृषदने ।

अर्.हन्तश्चिद्–यमिन्धते सञ्जनयन्ति जन्तवः ॥

सं ँयदिषो वनामहे स८ हव्या मानुषाणां ।

उत द्युम्नस्य शवस – [ ] **62**

**TS 2.1.11.3 (Padam)**

सोमः । तनूभिः । रुद्रियाभिः ॥ समिति । इन्द्रः । मरुद्भिरिति

मरुत् – भिः । यज्ञियैः । समिति । आदित्यैः । नः । वरुणः ।

अजिज्ञिपत् ॥ यथा । आदित्याः । वसुभिरिति वसु – भिः ।

सम्बभूवुरिति सं – बभूवुः । मरुद्भिरिति मरुत् – भिः । रुद्राः ।

समजानतेति सं – अजानत । अभि ॥ एवा ।

त्रिणामन्निति त्रि – नामन् । अहृणीयमानाः । विश्वे । देवाः ।

समनस इति स – मनसः । भवन्तु ॥ कुत्र । चित् । यस्य ।

समृताविति सं–ऋतौ । रण्वाः । नरः । नृषदन इति नृ–सदने ॥

अर्.हन्तः । चित् । यम् । इन्धते । सञ्जनयन्तीति सं – जनयन्ति । जन्तवः ॥ समिति । यत् । इषः । वनामहे । समिति । हव्या । मानुषाणाम् ॥ उत । द्युम्नस्य । शवसः । **62 (50)**

**TS 2.1.11.4**

ऋतस्य रश्मिमा ददे ॥

यज्ञो देवानाम् प्रत्येति सुम्नमादित्यासो भवता मृडयन्तः ।

आ वो ऽर्वाची सुमतिर्ववृत्याद॒ꣳहो श्चिद् या वरिवोवित्तरा ऽसत् ॥

शुचिरपः सूयवसा अदब्ध उप क्षेति वृद्धवयाः सुवीरः ।

नकिष्टं घ्नन्त्यन्तितो न दूराद् य आदित्यानां भवति प्रणीतौ ॥

धारयन्त आदित्यासो जगथ्स्था देवा विश्वस्य भुवनस्य गोपाः ।

दीर्घाधियो रक्षमाणा–[ ] **63**

**TS 2.1.11.4 (Padam)**

ऋतस्य । रश्मिम् । एति । ददे ॥ यज्ञः । देवानाम् । प्रतीति । एति । सुम्नम् । आदित्यासः । भवत । मृडयन्तः ॥ एति । वः । अर्वाची । सुमतिरिति सु – मतिः । ववृत्यात् । अꣳहोः । चित् । या । वरिवोवित्तरेति वरिवोवित् – तरा । असत् ॥ शुचिः । अपः ।

सूयवसा इति सु – यवसाः । अदब्धः । उपेति । क्षेति ।
वृद्धवया इति वृद्ध – वयाः । सुवीर इति सु – वीरः ॥
नकिः । तम् । घ्नन्ति । अन्तितः । न । दूरात् । यः । आदित्यानाम् ।
भवति । प्रणीताविति प्र – नीतौ ॥ धारयन्तः । आदित्यासः ।
जगत् । स्थाः । देवाः । विश्वस्य । भुवनस्य । गोपा इति गो–पाः ॥
दीर्घाधिय इति दीर्घ – धियः । रक्षमाणाः । **63 (50)**

**TS 2.1.11.5**

असुर्य–मृतावान–श्चयमाना ऋणानि ॥
तिस्रो भूमीर्धारयन् त्रीँ रुत द्यून् त्रीणि व्रता विदथे अन्तरेषां ।
ऋतेनाऽऽदित्या महि वो महित्वं तदर्यमन् वरुण मित्र चारु ॥
त्यान्नु क्षत्रियाँ अव आदित्यान्. याचिषामहे ।
सुमृडीकाँ अभिष्टये ॥
न दक्षिणा वि चिकिते न सव्या न प्राचीनमादित्या नोत पश्चा ।
पाक्या चिद्–वसवो धीर्या चिद् – [ ] **64**

**TS 2.1.11.5 (Padam)**

असुर्यम् । ऋतावान इत्यृत – वानः । चयमानाः । ऋणानि ॥

तिस्रः । भूमीः । धारयन्न् । त्रीन् । उत । द्यून् । त्रीणि । व्रता ।

विदथे । अन्तः । एषाम् ॥ ऋतेन । आदित्याः । महि । वः ।

महित्वमिति महि – त्वम् । तत् । अर्यमन्न् । वरुण । मित्र । चारु ॥

त्यान् । नु । क्षत्रियान् । अवः । आदित्यान् । याचिषामहे ॥

सुमृडीकानिति सु – मृडीकान् । अभिष्टये ॥ न । दक्षिणा । वीति ।

चिकिते । न । सव्या । न । प्राचीनम् । आदित्याः । न । उत ।

पश्चा ॥ पाक्या । चित् । वसवः । धीर्या । चित् । **64 (50)**

**TS 2.1.11.6**

–युष्मानीतो अभयं ज्योतिरश्यां ॥

आदित्यानामवसा नूतनेन सक्षीमहि शर्मणा शन्तमेन ।

अनागास्त्वे अदितित्वे तुरास इमं यँज्ञं दधतु श्रोषमाणाः ॥

इमं मे वरुण श्रुधी हवमद्या च मृडय ।

त्वामवस्युरा चके ॥

तत्त्वा यामि ब्रह्मणा वन्दमान–स्तदाशास्ते यजमानो हविर्भिः ।
अहेडमानो वरुणेह बोद्ध्युरुशꣳस मा न आयुः प्र मोषीः ॥ **65**

**<u>TS 2.1.11.6 (Padam)</u>**

युष्मानीतः । अभयम् । ज्योतिः । अश्याम् ॥ आदित्यानाम् ।
अवसा । नूतनेन । सक्षीमहि । शर्मणा । शन्तमेनेति शं – तमेन ॥
अनागास्त्व इत्यनागाः–त्वे । अदितित्व इत्यदिति – त्वे । तुरासः ।
इमम् । यज्ञम् । दधतु । श्रोषमाणाः ॥ इमम् । मे । वरुण ।
श्रुधि । हवम् । अद्य । च । मृडय ॥ त्वाम् । अवस्युः । एति ।
चके ॥ तत् । त्वा । यामि । ब्रह्मणा । वन्दमानः । तत् । एति ।
शास्ते । यजमानः । हविर्भिरिति हविः – भिः ॥ अहेडमानः ।
वरुण । इह । बोधि । उरुशꣳसेत्युरु – शꣳस ।
मा । नः । आयुः । प्रेति । मोषीः ॥ **65 (49)**

*(नामा – ऽग्निः सꣳ – शवसो – रक्षमाणा – धीर्यां चिदे – कान्नपञ्चाशच्च) (A11)*

=======================

**Prasna Korvai with starting Padams of 1 to 11 Anuvaakams :-**

(वायव्यं – प्राजपतिस्ता वरुणं – देवासुरा एष्व – सावादित्यो दशर्.षभा–मिन्द्रो वलस्य – बार्.हस्पत्यं – वँषट्कारो – ऽसौसौरीं – वँरुण –माश्विन – मिन्द्रं वँो नर – एकादश)

**Korvai with starting Padams of 1, 11, 21 Series of Panchaatis :-**

(वायव्य – माग्नेयीं कृष्णग्रीवी – मसावादित्यो – वा अहोरात्राणि – वषट्कारः – प्रजनयिता – हुवे तुराणां – पञ्चषष्टिः )

**First and Last Padam of First Prasnam of Kandam 2:-**

(वायव्यं – प्रमोषीः)

॥ हरिः ओं ॥

॥ कृष्ण यजुर्वेदीय तैत्तिरीय संहितां पद पाठे द्वितीयकाण्डे प्रथमः प्रश्नः समाप्तः ॥

## Summary breakup of Padam - in Kaandam 2, Prasnam 1

| Particulars | | Example ( in Pada PaaTam) | No. of Padams as per Pada PaaTam |
|---|---|---|---|
| सामान्य पदानि | Ord | इषे । त्वा । ऊर्जे । | 2493 |
| उपसर्ग पदानि | PRE | एति = (आ+इति) । उपेति = (उप+इति) । प्रेति = (प्र+इति) । | 279 |
| वेष्टन पदानि | PS | उपायवः = उपायव इत्युप - आयवः । बाहुभ्याम् = बाहुभ्यामिति बाहु - भ्याम्) । | 498 |
| प्रग्रह पदानि | PG | ते = (ते इति) । त्वे = (त्वे इति) । चक्षुषी = (चक्षुषी इति) । विष्णो = विष्णो इति॒ । | 5 |
| प्रग्रह वेष्टन पदानि | PGS | अधिषवणे = अधिषवणे इत्यधि - सवने । इन्द्राग्नी = इन्द्राग्नी इतीन्द्र - अग्नी | 3 |
| | | **Total Padams** | **3278** |

## Details of Panchati and Padam for Kandam 2 , Prasanam 1 – (TS 2.1)

| | Panchati | Padams |
|---|---|---|
| Anuvakam 1 | 6 | 313 |
| Anuvakam 2 | 9 | 443 |
| Anuvakam 3 | 5 | 265 |
| Anuvakam 4 | 8 | 392 |
| Anuvakam 5 | 7 | 353 |
| Anuvakam 6 | 5 | 253 |
| Anuvakam 7 | 7 | 369 |
| Anuvakam 8 | 5 | 250 |
| Anuvakam 9 | 4 | 195 |
| Anuvakam 10 | 3 | 146 |
| Anuvakam 11 | 6 | 299 |
| Total → | 65 | 3278 |

**Notes:**

- **Please refer to the book “TS Kandam 1” and “TS 1.1 Pada Paatam with Vaakyam” for notes and conventions used in this Compilation.**
- **Please download our vedic compilations from our web site www.vedavms.in.**